# षष्ठोऽध्यायः

## नवांशप्रतिपाद्यविषयसमीक्षा (नाड्यनुसारेण )

## ६.१ नाडीग्रन्थेषु नवमांशविचारः

भारतीयज्योतिषशास्त्रं आद्याष्टादशज्योतिर्धरैः निर्मापितमस्ति । अद्यापि तत्र लघु-गुरु त्रुटयः नैव दृश्यन्ते । आधुनिकज्योतिषं तथा प्राचीनज्योतिषम्, एतादृशाः भेदाः ज्योतिषशास्त्रे न सन्ति तथा च ज्योतिषस्याद्यसिद्धान्ताः अद्यापि मानवजीवनविषयस्य मूल्यांकनं कर्तुं सक्षमाः अनन्याश्च सन्ति ।

उत्तरभारते, दक्षिणभारते, पूर्वभारते, पश्चिमभारते वा मध्यभारते वयं द्रश्यामः चेत् भारतखण्डस्य एकापि दिशा तादृशी नास्ति यत्र एकोऽपि ज्योतिर्विदो नास्ति, सर्वत्र ज्योतिर्विदास्तु वर्तन्तेऽव ।

ज्योतिषविद्या ईश्वरीय विद्या वर्तते । अस्याः विद्यायाः बुधाः देवज्ञाः कथिताः सन्ति । एभिः देवज्ञैः कुण्डलीनां, राशिनां, नक्षत्राणाम् च नैकवारं विभाजनं कृत्वा नैकवारं संयोजनं च कृत्वा ग्रहाणां, भावानां च परिप्रेक्षे जीवनस्य सत्यता कुण्डली-आधारेण अद्भूतरीत्या ज्ञापितः ।

दक्षिणभारते एकराशेः ३० अंशाः गणिताः किन्तु ते राशिं प्रकृतिजन्य-परिवर्तनं प्रदातुम् एकं विशालं क्षितिजं वा दातुं तान् १५० नाडीषु विभाजितवन्तः तथा तैः ज्योतिषशास्त्रे नाडी-ज्योतिषस्य विश्लेषणात्मकः अभ्यासः प्रस्तुतः ।

दक्षिणभारते विविधविषयोपरि ज्योतिषशास्त्रस्य ग्रन्थाः उपलभ्यन्ते, तानेव ग्रन्थान् वयं उत्तरभारते संहिताग्रन्थाः इति जानीमः । एतदेव विषयवस्तुं सम्यक्-रीत्या दक्षिणभारतस्य विचक्षणज्योतिर्विद्भिः नाडीपरत्वविचारं कृत्वा अस्मान् सुगमरीत्या ज्ञापयितुं प्रयत्नः कृतः । वयं द्रक्ष्यामः चेत् दक्षिणभारत-उत्तरभारतयोः

ग्रहाणां, राशिनां, भावानां च गुणधर्माः तथा विषयाः भारतस्य प्रचलितज्योतिषात् किञ्चिदपि भिन्नाः नास्ति, तथापि नाडीशब्दश्रवणेनैव उत्तरभारतस्य ज्योतिष-रसिकेषु नैकाः प्रश्नाः कौतुकेन सह उद्भवन्ति, कारणं यत् उत्तरभारते यत् ज्योतिषं अस्मान् जन्मतः परिवेषितमस्ति, तस्मिन् नाडीशब्दस्य अभावेन एतादृशं भवत्येव।

नाडीं विज्ञाय ज्योतिषशास्त्रे अग्रे एधामहे तदा समग्रभारते (उत्तरे, दक्षिणे, पूर्वे च) अस्माकम् अष्टादशज्योतिर्धरैः यत् किमपि वर्णितमस्ति, तत् सर्वत्र समानमेव वर्तते । तस्मिन् भारतभागपरिवर्तनेन कोऽपि भेदो न भवति ।

दक्षिणभारते नान्दीनाडी-अगस्तनाडी-भृगुनाडी-सम्बन्धिनाडीग्रन्थाः वर्तन्ते किन्तु उत्तरभारते त एव ग्रन्थाः नंदीसंहिता, अगस्तसंहिता, भृगुसंहिता नाम्ना विख्याताः सन्ति । परिप्रेक्षेऽस्मिन् १८ आद्यज्योतिर्विद्भिः प्रथमक्रमस्थस्य सत्या-चार्यस्य नाडीग्रन्थेषु नाडीविषये स्पष्टिकरणं प्रदत्तमस्ति ।

अत्र दीपमानेषु विषयवस्तुषु सत्याचार्यस्य ध्रुवनाडी-मूलग्रन्थमाधारीकृत्य विषयोऽयं स्पष्टयितुं भूरीशो प्रयत्नो विहितो वर्तते ।

### ६.१.१ नाडीपरिचयः :-

यथा वयं कुण्डल्यां राशि-अंश-कला-विकलानामुपरि राशि-भाव-ग्रहाणां प्रमाणं निष्कास्य तस्याधारेण गणितकार्यं कृत्वा फलादेशीयधारणानां विषये विचारं कुर्मः तथैव नाडयः अपि राशेः एकः कालात्मकस्वरुपं वर्तते । दक्षिणभारतेः राशेः अभ्यासाय तस्य कलात्मकभागतः (नाडीतः) कुण्डलीनां फलादेशविचारः क्रियते ।

नाडी जन्मकुण्डल्याः राशेः १५०तमो भागः वर्तते । वयं गणितिकरीत्या जानीमः चेत्

एकाराशि: = ३० अंशाः ।

एक-अंश: = ६० कला ।

राशेः उपरोक्तकोष्टकात् वयं परित्यक्ताः स्मः । अधुना दक्षिणभारते नाडीं राशेः १५० तमो भागः गण्यते । यथा–

एका राशि: = १५० नाडी ।

एका राशि: = ३० अंशाः ।

एका राशि: = ३० x ६० कलाः ,अतः

एका राशि: = १८०० कलाः ।

१८०० कला = १५० नाडयः,

अथवा एका नाडी – १२ कलाः, तस्मात् एका नाडी १२ कलायाः भवति । एकस्यां राशौ १५० नाडयः भवन्ति ।

### ६.२ नाडीनां क्रमः :-

नाडीग्रन्थेषु १५० नाडीनां क्रमः अधोलिखितानुसारं वर्तते ।[299]

| | | |
|---|---|---|
| १वसुधा | ५१गह्वरा | १०१सङ्गीता |
| २वैष्णवी | ५२कुदिनी | १०२सामदात |

[299]નવમાંશ અષ્ટકવર્ગ અને નાડી રહસ્ય, પૃ. ૧૪૮ લેખક- ચંદુલાલ એસ. પટેલ, સુમન પ્રકાશન, મુંબઈ

| | | |
|---|---|---|
| ३ब्राह्मी | ५३रौद्रा | १०३समा |
| ४कालक्य | ५४विषाख्या | १०४विश्वम्भरी |
| ५शाङ्करी | ५५विषनाशिनी | १०५कुमारी |
| ६सुधाकरी | ५६निर्मदा | १०६कोकिला |
| ७समा | ५७शीतला | १०७कुञ्जरावृत्तिः |
| ८सौम्या | ५८निम्रा | १०८ऐन्द्रा |
| ९सुरा | ५९प्रीता | १०९स्वाहा |
| १०माया | ६०प्रियवर्धिनि | ११०स्वरा |
| ११मनोहरा | ६१मानघ्रा | १११वह्यी |
| १२माधवी | ६२दुर्भगा | ११२प्रीता |
| १३मञ्जुस्वना | ६३चित्रा | ११३रक्षजलप्याला |
| १४वेरा | ६४चित्रिणी | ११४वारुणी |
| १५कुभिनि | ६५चिरजीविनी | ११५मदिरा |
| १६कुटिला | ६६भूपा | ११६मैत्री |
| १७प्रभा | ६७गदहरा | ११७हारिणी |
| १८परा | ६८नाला | ११८हरिणी |
| १९पयस्विनी | ६९नलिनी | ११९मरुतः |
| २०माला | ७०निर्मला | १२०धनञ्जयः |
| २१जगती | ७१नदी | १२१धनकारी |
| २२जर्जरा | ७२सुधामृतांशुकालिका | १२२धनदा |
| २३ध्रुवा | ७३कलुषांकुरा | १२३अम्बुजा |
| २४मुसला | ७४त्रैलोक्य मोहनकरी | १२४कच्छपा |
| २५मुग्धरा | ७५महामारी | १२५शूलिनी |
| २६पाशा | ७६सुशीतला | १२६रौद्री |
| २७चम्पका | ७७सुखदा | १२७शिवा |
| २८दामाङ्का | ७८सुप्रभा | १२८शिवकरी |
| २९मही | ७९शोभा | १२९शिरंकरी |
| ३०कलुषा | ८०शोभना | १३०कला |
| ३१कमला | ८१शिवदा | १३१कुन्दा |
| ३२कान्ता | ८२ शिवा | १३२मुकुन्दा |
| ३३काला | ८३बला | १३३भरता |
| ३४कृकला | ८४ज्वाला | १३४हसिता |
| ३५क्षमा | ८५गदा | १३५कदली |
| ३६दुर्धरा | ८६गाधा | १३६स्मरा |
| ३७दुर्गमा | ८७नूतना | १३७कण्डला |
| ३८विश्वा | ८८सुमनोहरा | १३८पापा |
| ३९विशीर्णा | ८९शोभावली | १३९कामिनी |

| | | |
|---|---|---|
| ४०विकटा | ९०सोमलता | १४०कलशोद्भवना |
| ४१आविला | ९१मणका | १४१वीरप्रसूः |
| ४२विभ्रमा | ९२मुद्रिका | १४२संगरा |
| ४३सुखदा | ९३क्षुधा | १४३शतयज्ञा |
| ४४स्निग्धा | ९४मोक्षायवर्गः | १४४शतावरी |
| ४५सोदरा | ९५वलया | १४५विरहपा |
| ४६सुरसुन्दरी | ९६नवनीता | १४६प्रह्वी |
| ४७अमृतप्लाविनी | ९७निशाचरी | १४७पाटलिनी |
| ४८काला | ९८निवृतिः | १४८नागा |
| ४९कामधुक् | ९९निगदा | १४९पङ्कजा |
| ५०करविरिणी | १००सारा | १५०परमेश्वरी |

अत्र नाडीनां क्रमः १ तः १५० दत्तमस्ति, ताः नाड्यः क्रमेण- चरराशिः, स्थिरराशिः, तथा द्विस्वभावराशिषु भिन्न-भिन्नरीत्या परिगण्यते । यथा-

**खपञ्चेन्दुमिता नाड्यश्चरभे व्यत्यये स्थिरे ।**

**षट् सप्ततिं समारभ्य द्विस्वभावेषु राशीषु ।।**[300]

चं. ना. भा.-१, पृ. ३५३

**६.२.१ चरराशेः क्रमः :-**

चरराशौ यदि जन्मकुण्डल्यां लग्नं समाश्रितं भवति, तर्हि तस्य क्रमः १ तः १५० अर्थात् वसुधा तः परमेश्वरीपर्यन्तं गण्यते ।

**६.२.२ स्थिरराशेः क्रमः :-**

300नवमांश अष्टकवर्ग अने नाडी रहस्य, पृ. १५१, सुमन प्रकाशन, मुंबई १९९६

यदि जन्मकुण्डल्यां लग्नं स्थिरराशौ समायाति चेत् तस्य क्रमः १५० तः १ विरुद्धक्रमे अर्थात् परमेश्वरीतः वसुधा पर्यन्तं गण्यते ।

### ६.२.३ द्विस्वभावराशेः क्रमः :-

जन्मकुण्डल्याः लग्नं ९६ तः १५० तथा तदनु १ तः ९५ अर्थात् सुशीलातः आरभ्यः परमेश्वरीपर्यन्तं तथा वसुधा तः महामारीपर्यन्तम्, अनया रीत्या भागद्वयं कृत्वा १५० नाडीनां क्रमः गण्यते ।यथा राशौ एका नाडी १२ कलायाः गण्यते तथैव जन्मकुण्डल्याः एकभावस्य समयः होराद्वयस्य गण्यते ।

अतः —

कुण्डल्याः १ भावः = २ होरा

१२० =(लिप्त:) मिनिट

=७२०० (निमेष:) सेकन्ड

७२०० निमेषस्य एकभावः १ राशेः समावेशं करोति, अतः ७२०० निमेषाः= १५० नाडयः भवन्ति ।

इत्थम् एकानाडी =७२००-१५०=४८ निमेषाः परिगण्यन्ते ।

जन्मकुण्डलीनिर्माणे यदा समयः अशुद्धो भवेत् तदा एकस्याः नाड्याः अपि क्षतिः भवेत् तथा नाडीनां क्रमसंख्या अपि परिवर्तिता भवति । अतः नाडीज्योतिषे समयस्य शुद्धेः अनिवार्यता आवश्यकी वर्तते । सामान्यतया नाडीज्योतिषे कुण्डलीनिर्माणसमये ४८ कलादृशोऽपि भेदः न करणीयः । समयशुद्धिः नाडीनां

परिगणने अधिकमहत्त्वं धारयति तथा गणनक्रियायां क्षतिजाते सति नाडीनां स्वरूपमपि परिवर्तते ।

नाडयः भिन्न भिन्न प्रकृतीनां द्योतिकी वर्तन्ते । प्रत्येकनाडी एकमेवं प्रकृतेः दर्शनं कारयति अथ समेऽपि नाडीनां नामानि स्त्रीनामानि सन्ति तथा वयं स्त्रीप्रकृतिं जानीमहे । स्त्रीसमाना प्रकृतिर्भवति ।ज्योतिषशास्त्रस्य फलकथने अत एव नाड्यः प्रकृतिजन्यप्रवृतिः विशेषमहत्त्वं धारयन्ति ।

सामान्यतया मानवशरीरं नैकानाडीभिः पूरितं वर्तते तथा समेऽपि नाड्यः सदा जीवन्तः भवन्ति । यावत् नाड्यः जीवन्ति तावदेव जीवनं वर्तते । एताः नाड्यः अस्माकं जीवनस्य तथा तस्य विकासस्य प्रगतेश्च द्योतिका: वर्तन्ते । अतः ज्योतिषशास्त्रेऽपि  नाड्यः प्राणदायिनी मत्वा तस्य फल किं प्राप्प्स्याम जातकः, कीदृशी प्रकृतिः तस्य कृते लाभदायि वा कष्टदायी ? तस्य विचारमपि नाडीज्योतिषे नाड्याऽऽधारेणैव भवति । एकस्याः राशेः १५० नाडयः तथा १२ राशेः १८०० नाड्यः एकस्यां कुण्डल्यां जीवने आगम्यमानाघातप्रत्याघातेऽपि महत्त्वं धारयति ।

नाडीप्रकृति-निर्देशकं भूत्वा जीवनस्य प्रकृतिपुरुष(स्त्री-पुरुष)निर्देशिका भूत्वा प्रत्येकस्या नाड्याः भागद्वयं क्रियते । एका नाडी १२ कलायाः भवति, तस्मिन् न्याये भागद्वयं ६-६ कलायाः भवति । प्रथमभागं पूर्वार्धं तथा द्वितीयभागम् उत्तरार्धं ज्ञायते तथा तस्मिन् स्थित प्रकृतितत्त्वं स्त्रीपुरुषयोः भेदे विभज्यते ।

जन्मकुण्डल्यां लग्नस्थानं तथान्यैकादशभावाः मिलित्वा द्वादशभावाः भवन्ति । द्वादशभावेषु सूर्यः, चन्द्रः, भौमः, बुधः, गुरुः, शुक्रः, शनिः, राहुः तथा केतुः एते

नवग्रहाः स्थिताः भवन्ति। एतेषां ग्रहाणां फलं ते कासां नाडीनामुपरी विराजमानाः भवन्ति तेषामुपरि निर्धारितः वर्तते ।

## ६.३ जन्मकुण्डल्यां विविधनाडीविचारः:-

जन्मकुण्डल्याः लग्नः तथा ग्रहाणां नाडीज्ञानेन नाडीशास्त्रस्य बृहत् गणितस्य द्वाराणि उद्घाटितानि भवन्ति । सर्वप्रथमलग्नं तथा ग्रहाणां नाडी-अन्वेषणाय लग्न तथा ग्रहान् तेषां स्वाभाविकता च एतेषु त्रयेषु प्रभागेषु विभज्यन्ते यथा लग्नं वा ग्रह: चरराशौ भवति तदा मेषः, कर्क:, तुला तथा मकरराशिः भवति । कोऽपि लग्नः वा ग्रहः स्थिरराशौ भवेत्तदा वृषभ:, सिंहः, वृश्चिक: तथा कुम्भराशिः भवति । अनया रीत्या लग्नः ग्रह: वा द्विस्वभावम् राशौ भवेत्तदा मिथुनम्, कन्या धनम् तथा मीनराशिः भवति । एवं लग्नस्य वा ग्रहाणां चरस्थिरद्विस्वभावेषु विभाजनं कृत्वा जन्मकुण्डल्याः, लग्नस्य तथा सूर्यादिनवग्रहाणाम् अंशकलाः ज्ञातव्या तयोराधारं नीत्वा लग्नग्रहयोः कला: १२ कलायां विभज्य तस्य अंशादेः १२ कलायाः संख्या प्राप्यते ।

अधुना वयं जानीमः तदनुसारं भागकलानां संख्यायाः गणना चरराशौ लग्न: वा ग्रहः भवेत् तदा १ तः १५० इत्यस्य क्रमे यः क्रमः आगच्छति तस्य क्रमस्य नाडी भविष्यति, यदि स्थिरराशौ लग्नः वा ग्रहः भवेत्तदा १५० तः १ इतिविरुद्धक्रमेण या नाडी आगच्छन्ति सा नाडी गण्यते, यदा लग्नः वा ग्रहः द्विस्वभावराशौ स्यात् तदा १५० नाडीगणनायाः प्रारम्भः ९० तः ९५ इत्यन्तं या नाडी समागच्छेत् तस्याः नाड्याः परिगणना कर्तव्या ।

अस्मिन् अधोलिखित उदाहरणेन सरलतया ज्ञास्यामः ।

उदाहरणम् :- एकस्य जातकस्य जन्मदिनाङ्कः- ०२/०२/१९४२ सायंकाले ५:३७ वादने सिद्धपुरनगरे जातः, तस्य कुण्डली भविष्यति यथा-

- लग्ननाडी- लग्नस्य अंशः ०९ तथा कलाः ५६ वर्तते, तस्य समासेनकलाः ५९६ भविष्यन्ति तं १२ संख्यया विभज्य ४९ नाड्यः तदा शेषः ०८ कलाः भविष्यन्ति । लग्नः चरराशेः भवेत् तस्य गणना १ तः ५० पर्यन्तम् अर्थात् वसुधातः करविरिकीपर्यन्तं समागमिष्यति इत्थं लग्नस्य नाडी करवीरिणी भवति ।

- सूर्यस्य नाडी- सूर्यस्य अंशः १९ तथा कलाः ५७ वर्तन्ते, तस्य समासेनकलाः ९९९ भविष्यन्ति, तं १२ संख्या सह विभाजनेन ९९ नाड्यः तथा शेष: ११ कलाः समागमिष्यन्ति, सूर्यचरराशौ मकरे स्यात् तस्याः गणना १ तः १०० पर्यन्तम् अर्थात् वसुधातः सारापर्यन्तनाड्यः समागमिष्यन्ति इत्थं सूर्यस्य नाडी सारा भवति ।

- चन्द्रस्य नाडी- चन्द्रस्य अंशः ०३ तथा कलाः १५ वर्तन्ते, तस्य समासेनकलाः १९५ भविष्यन्ति, तां १२ संख्यया विभाजनेन १६ नाड्यः तथा शेषः ०३ कलाः भवन्ति, चन्द्रः स्थिरराशौ सिंहे वर्तते, तस्य गणना १५०तः अर्थात् परमेश्वरी तः विरुद्धक्रमे १७ तमी नाडी १३३तमी अर्थात् भरता भवति ।

- भौमस्य नाडी- भौमस्य अंशाः १८ तथा कलाः १४ वर्तते । तस्य समासेनकलाः १०९४ भविष्यन्ति, तां १२ संख्यया विभाजनेन १८ नाड्यः तथा शेष: १० कलाः समागमिष्यन्ति । बुधः स्थिरराशौ कुम्भे सति तस्य गणना १५०

तः अर्थात् परमेश्वरीतः विरुद्धक्रमे गणनया १९तम नाडीतः १३१तम कुन्दा नाडी समागमिष्यन्ति इत्थं भौमस्य नाडी कुन्दा सम्भूता।

- बुधस्य नाडी- बुधस्य अंशाः ०३ तथा कलाः ४६ सन्ति। तस्य सर्वाः कलाः २२६ भवन्ति, तान् १२ संख्यया विभाजनेन १८ नाड्यः तथा शेषः १० कलाः समागमिष्यन्ति बुधः स्थिरराशौ कुम्भे भवेत् अतः तस्य गणना १५० अर्थात् परमेश्वरीतः विरुद्धक्रमे आगमिष्यति इत्थं बुधस्य नाडी कुन्दा सञ्जाता।

- गुरोः नाडी- गुरोः अंशाः १८ तथा कलाः २१ सन्ति, तस्य पूर्णाः कलाः ११०१ भविष्यन्ति। १ तः १२ संख्यया विभाजनेन ९१ नाड्यः तथा ०९ कलाः शिष्यन्ते। गुरुस्थिरराशौ वृषभे भवति तदा तस्य गणना १५० तः ९२तमी नाडी सञ्जाता।

- शुक्रस्य नाडी- शुक्रस्य अंशाः २० तथा कलाः २१ भवन्ति पूर्णाः कलाः १२२१ भवन्ति, तां १२ संख्यया विभाजनेन १०१ नाड्यः शेषः ६९ कलाः भवन्ति। शुक्र चरराशौ मकरे भवेत्तदा तस्य गणना वसुधातः गणनेन १२०तमी नाडी सामदा भवति इत्थं शुक्रस्य नाडी सामदा भवन्ति।

- शनैश्चरस्य नाडी- शनैश्चरस्य अंशाः अष्टविंशतिः तथा कलाः अष्टत्रिंशत् भवन्ति तदा पूर्णाः कलाः १९१८ भविष्यन्ति तां १२ संख्यया विभाजनेन १४३ नाड्यः तथा शेषः कलाद्वयं भवति। शनिः चरराशौ मेषे भवति तदा तस्य गणना १तः (वसुधातः) गणनेन १४४तमनाडी शतावरी भवति इत्थं शनेः नाडी शतावरी जाता।

 राहोः नाडी- राहोः अंशाः २२ तथा कलाः ०४ सन्ति । पूर्णकलाः १३२४ भविष्यन्ति । तां १२ संख्यया विभाजनेन ११० नाड्यः तथा शेषकलाः ४ समागमिष्यन्ति । राहुः स्थिरराशौ सिंहे स्यात्तदा तस्य गणना १५०तः (परमेश्वरीतः) विरुद्धक्रमे १११तमनाडी ३९तम भवति इत्थं राहोः नाडी विशीर्णा जाता ।

 केतोः नाडी- केतोः नाड्यपि विशीर्णा एव भविष्यति कारणं केतोः स्थिरराशि: तथा अंश-कला: राहुवदेव वर्तन्ते ।

इत्थं खग्रहाणां तथा लग्नानां च नाडीं ज्ञात्वा तस्य गाणितिकमुपयोगं कृत्वा नाडीशास्त्रस्य नियमानुसारं जातकानां वर्गकुण्डलीनां निर्माणं कर्तुं शक्यते । वर्गकुण्डलीद्वारा जातकजीवनस्य विविधविषयाणामुपरि जन्मकुण्डलीतः विशेषप्रकाशकर्तुं शक्यते । जातकस्य अभिभावकाः, भ्रातरादयः, आरोग्यं, पति-पत्नीः, आयुष्यं, सुखं, सुखाकारी, यात्रा-प्रवासप्रभृतयः विषयाः मानवजीवनं स्पर्श्यमाणाः समेऽपि विषयाणामुपरि फलादेशः कर्तुं शक्यते ।

जन्मकुण्डल्याः स्पष्टलग्नस्य तथा ग्रहाणां नाडीं सम्यक् ज्ञात्वा वयं सरलतया षोडशवर्गकुण्डलीनामपि निर्माणं कर्तुं शक्नुमः । षोडशवर्गाणां कुण्डलीनिर्माणं गाणितिकक्रियां विनाऽपि लग्नग्रहयोः नाडीं ज्ञात्वा सरलतया षोडशवर्गकुण्डल्यः कर्तुं शक्यते, तत्र न्यूनाति न्यूनः समयः जायते । षोडशवर्गकुण्डली अर्थात् जन्मकुण्डली-आधारेण जन्मकुण्डलीं १६ (षोडशभागेषु)विभज्य १६ वर्गकुण्डल्यः भवन्ति । यथा- होरा-द्रेष्काण-चतुर्थांश-सप्तमांश-नवमांश-दशांश-द्वादशांश-

षोडशांश-विशांश-चतुर्विशांश-त्रिशांश-स्वदशांश-अक्षवेदांश-षष्ट्यंशादीनां निर्माणं भवितुं शक्यते ।

**६.४ नाड्यः कयारीत्या फलं ददन्ति इति विश्लेषणम् :-**

अधुना एताः नाड्यः कयारीत्या फलं ददन्ति, तस्य रहस्यं नाडीग्रन्थेषु काचित् कुञ्चिकारूपसिद्धाधारीतः वर्तते, यस्योपयोगं कृत्वा सत्यफलादेशाः तारयितुं शक्यते।

नाडीनां द्वौ भागौ वर्तेते –पूर्वार्ध: उत्तरार्धश्च ।

समेऽपि नाड्यः १२ कलायाः भवन्ति, नाड्योः भागद्वयं क्रियते चेत् प्रथमभागः ०६ कलाः, द्वितीयभागः ६ कलाः भवन्ति । ०६ कलायाः प्रथमो भागः नाम एको भागः विषयभाग: कथ्यते, द्वितीयभाग: सममार्ग: कथ्यते ।

विषमभाग: पुरुषद्योतकः वर्तते, अतः लग्न वा ग्रहनाडेः विषमभागात् प्रारम्भः भवेत् चेत् तेन सूचितफलेषु पुरुषसूचितविषयाणां शुभफलं प्राप्यते, यतो हि समभागः स्त्रीद्योतको भवति, अतः लग्न वा ग्रह नाडेः समभागात् प्रारम्भः भवति चेत् सूचितफलेषु स्त्रीसूचितविषयाणां शुभफलं प्राप्यते । मुख्यत्वे नाडीशास्त्रस्य एतस्य प्राथमिकनियमस्य फलं सामान्यस्वरुपनाडीशास्त्रस्य ज्योतीर्विद्भिः विचारणीयं भवति ।

**६.४.१ लग्नस्य कालात्मकनाडीफलम् :-**

**उत्तरांशे प्रजातस्य पितृ-मातृ चिरायुषः ।**

**पूर्वभागे  ज्येष्ठ भ्रातु: दीर्घायुष्यः विदन्ति ते।।**[301]

**अर्थः –** यदि  जन्मलग्ने नाड्याः उत्तरांशभागः भविष्यति चेत् जातकस्य माता-पिता दीर्घायुः भवति, यदा नाड्याः पूर्वांशभागः स्यात् चेत् ज्येष्ठभ्राताः दीर्घायुः भवति । तद्वदेव-

**उत्तरांशे प्रजातस्यभगिन्यौ द्वौ सुपुत्रिणी ।**

**पूर्वभागे तथा वन्ध्या वैधव्ये न च कर्षिता ।।**[302]

अर्थात्यदि  जन्मलग्ने नाड्याः उत्तरांशभागः भविष्यति चेत् जातकस्य द्वौभगिन्यौ भवतः, तौ द्वौ दीर्घायुः भवत:, यदा नाड्याः पूर्वांशभागः स्यात् चेत् तौवन्ध्या वैधव्ययुक्ता च भवतः ।

**विवेचनम् :-**

पूर्वोक्तश्लोके नाड्याः उत्तरभागे यदि जातकस्य लग्नं समायाति अर्थात् नाड्याः प्रथम०६ कलासु मध्यस्थितनाडीतः प्रारम्भो भवति चेत् जातकस्य पितरौ दीर्घायुयुक्तौ भविष्यतः, तस्यार्थो वर्तते यत् एतादृशौ जातकौ सुखी तथा व्यवसायिकरीत्या सफलौ भविष्यत: । यदि नाड्याः द्वितीयकला मध्ये अर्थात् नाड्याः सप्तमकलातः १२कला मध्ये लग्नस्य प्रारम्भः स्यात् चेत् एतादृशाणाम्

[301]નવમાંશ અષ્ટકવર્ગ અને નાડી રહસ્ય, પૃ. ૧૬૩, સુમન પ્રકાશન, મુંબઈ ૧૯૯૬

[302]નવમાંશ અષ્ટકવર્ગ અને નાડી રહસ્ય, પૃ.૧૬૩, સુમન પ્રકાશન, મુંબઈ ૧૯૯૬

जातकानां ज्येष्ठभ्राता दीर्घायुर्भवति(जन्मकुण्डल्यां तृतीयभावः साहसस्य अपि वर्तते), अतः एतादृशाः जातकाः साहसी भविष्यन्ति, नूतनसाहसेन सुखिनः अपि भविष्यन्ति ।

**उत्तरांशे मातृवर्गे प्रजावृद्धी महत् सुखम् ।**

**मातुल त्रयमित्याहुरेकः कश्चित् सुभाग्यवान् ।।**

**अर्थः** :- नाड्याः उत्तरकलात्मकभागे जातकस्य जन्मः स्यात् तदा मातुलपक्षे वंशवृद्धिः भविष्यति तथा जातको मातुलत्रयस्य सुखं प्राप्स्यते, तस्मिन्नपि एक: अत्यन्तः भाग्यशाली भविष्यति ।

**विवेचनम्** :- लग्नं नाड्याः उत्तरार्धे प्रारभ्यते चेत् तादृशस्य जातकस्य पितामहः अर्थात् सप्तमस्थानं मन्ये प्रतिदिनस्य प्रवृत्तिविषये किमपि अशुभं अनुभविष्यति तादृशः विचारः क्रियते तथा नाड्याः पूर्वार्द्धे प्रारभ्यते चेत् एतादृशाणां जातकानां मानसिकनिर्भयता १६तमे वर्षे समाप्ता भविष्यति तथा समाजजीवने संलग्नाः भविष्यन्ति । "उत्तरांशे भर्तृयोग प्राबल्यं चोत्तरोत्तरम् ।। अर्थात् यदि स्त्रीजातकस्य जन्मनाड्याः उत्तरकलात्मकभागे अभविष्यत् चेत् तादृशी स्त्री पतिसुखं उत्तरोत्तरप्रबलतया प्राप्स्यते ।

**विवेचनम्** :-

उपरोक्तश्लोकः स्त्रीय: कृते सुखार्थविवेचनाय विरचितः वर्तते । यदि स्त्रीजातकस्य जन्म नाड्याः उत्तरभागे स्यात् चेत् तादृशी स्त्री विवाहान्तरं प्रतिदिनं पतिसुखं बृहन्मात्रयां प्राप्स्यते ।

**गुरु द्रष्टो सुदीर्घायुः स्थूलकाय स्वरूपवान् ।**

**गुरु द्रष्टि फलं पूर्ण पूर्वभागस्य जातके ।।**

**अर्थः** :- जातकस्य जन्मलग्ने गुरोः दृष्टिर्भवेत् चेत् जातको दीर्घायुः भवति तथा च शरीरस्थूले सत्यपि स्वरूपवान् भवति । यदि पुरुषजातकस्य जन्म नाड्याः पूर्वकलात्मकभागे अभविष्यत् तथा गुरोः दृष्टिः स्यात् चेत् तं जातकं गुरुदृष्टेः सम्पूर्णफलं प्राप्यते । अत्र उत्तरार्धस्योलेखः नास्ति किन्तु पूर्वार्द्धे गुरुदृष्टिः शुभफलं वर्णितं किन्तु उतरार्धानुदृष्टया पूर्वार्द्धे कलात्मकनाडी भागे लग्नारम्भो भवेत् चेत् विशेषशुभफलं प्राप्स्यते ।

**कान्तारागे पूर्वभागे मृगलग्ने तु जायते ।**

**विप्रजन्म: सुखी नित्यं चतुर्थोऽयं प्रकीर्तितः ।।**

**अर्थः** :- चरलग्नस्य अर्थात् मकरस्य प्रारम्भः ३२ तमकान्ता नाड्याः पूर्वभागतः स्यात् चेत् सः जातकः ब्राह्मणो भवति, सदा सुखं प्राप्नोति तथा मातुः चतुर्थगर्भात् जायमानः स्यादिति । **विवेचनम्** :- यदि जातकस्य जन्म ३२ तमकान्ता नाड्याः पूर्वभागस्य प्रारम्भे मकरलग्ने स्यात् सः जातकः जन्मतः ब्राह्मणो भवति तथा तस्या: मातुः चतुर्थसन्तानरूपेण जन्मो जायते एवञ्च सः जातको जन्मतः मृत्यु पर्यन्तं सदा सुखी जीवनं यापयति ।

**“उत्तरांशे धनलग्ने विप्रजन्मा दरिद्रकम्”**

**अर्थः** :- नाड्याः उत्तरकलात्मकभागे उत्पन्नो जातकः ब्राह्मणो भवेत् किन्तु सः दरिद्रमपि अवाप्नोति ।

**विवेचनम्** :- यदि जातकस्य जन्मकुण्डल्याः लग्ननाडी उत्तरकलात्मकभागे प्रारभ्यते चेत् जातकः ब्राह्मणस्तु स्यात् किन्तु सुखी न स्यात् अर्थात् दारिद्रतां न त्यजति । एतादृशाः जातकाः श्रेष्ठाः किन्तु जीवनसुखविषये संघर्षरताः दृश्यन्ते अर्थात् दारिद्रतां प्राप्नुवन्ति ।

### ६.४.२ भावत्रयस्य नाडीफलम् :-

जन्मकुण्डल्याः लग्नानां प्रकारत्रयं वर्तन्ते । यथा- चरप्रकारः, स्थिरप्रकारः द्विस्वभावप्रकारश्च । चरप्रकारे मेषः, कर्कः, तुला तथा मकरराशिः समागच्छन्ति, स्थिरप्रकारे वृषभः, सिंहः, वृश्चिकः तथा कुम्भराशिः आगछन्ति, द्विस्वभावप्रकारे मिथुनकन्याधनमीनराशिः चागच्छन्ति ।

**खपञ्चेदुभिता नाड्यश्चरभे व्यत्येय स्थिरे ।**

**षड् सप्ततिं समारभ्य द्विस्वभावेषु राशिषु ।।**

नाडीज्योतिषे चरप्रकारस्थलग्नानां विचारसमये नाडीनां विचारः कुर्मः चेत् ताः नाड्यः वसुधातः परमेश्वरीपर्यन्तं गण्यन्ते । स्थिरप्राकारस्थलग्नेषु परमेश्वरीतः वसुधा पर्यन्तम् इति विरुद्धक्रमे गण्यते, यतो हि द्विस्वभावे ७६ तमसुशीतलातः अर्थात् मध्यात् प्रारभ्य मध्यपूर्वस्य ७५ तमनाडी महामारीपर्यन्तं पूर्णक्रमे गण्यते।

### ६.५ चरलग्नविचारः :-

**चरलग्ने पूर्वभागे कुलीरे तु प्रजायते ।**

**विप्रजन्मा सुखी नित्यं सीमन्ततनयः स्मृतः ।।**

**अर्थः** :- जातकस्य जन्म चरलग्ने तथा सप्तविंशतिः चम्पकानाड्याः पूर्वभागे अभविष्यत् चेत् सः ब्राह्मणकुले जन्मं लभते तथा च सः माता-पित्रोः प्रथमपुत्रो भूत्वा सदा सुखी भवति ।

**विवेचनम्** :- यस्य जातकस्य जन्म चम्पकानामक २७ तमनाड्याः पूर्वभागे चरलग्ने स्यात् चेत् सः ब्राह्मणकुले जन्म लभते तथा सः तस्य माता-पित्रोः प्रथमसन्तानो भूत्वा नाड्याः पूर्वभागे जन्मवशात् सदा सुखी जीवनं यापयतीति ।

**धनदांशे पूर्वभागे मेषलग्ने प्रजायते ।**

**शुद्रजन्मे सुखी नित्यं सप्तमो भवति ध्यसौ ।।**

**अर्थः** :- मेषलग्ने १२ तमधनदा नाड्याः पूर्वकलात्मकभागे उत्पन्नो जातकः शुद्रकुले जन्ममवाप्नोति तथापि नित्यं सुखी भविष्यति तथा तस्य मातुः सप्तमगर्भात् तस्य जन्मो भविष्यति ।

**विवेचनम्** :- अत्र अच्युतदैवज्ञः ज्ञापयति यद् जातकस्य जन्म मेषलग्ने तथा लग्नस्य प्रारम्भो धनदानाड्याः पूर्वभागात् भवति चेत् सः शुद्रकुले जन्म लप्स्यते तथा सर्वदा सुखी भवति तथा तस्य मातुः सप्तमसन्तानं भविष्यति ।

**त्रैलोक्यांशे चरलग्ने पूर्वभागे प्रजायते ।**

**शुद्रजन्मा सुखी नित्यं तु यदि गर्भात्तु जातकः ।।**

**अर्थः** :- ७४ तमत्रैलोक्यमोहनकरी नाड्याः पूर्वभागे यदि चरलग्नस्य प्रारम्भो भवति चेत् सः जातकः शुद्रकुले जन्मं लभते तथा सदा सुखी भवति एवञ्च जातको स्वमातुः चतुर्थसन्तानं भवति ।

**विवेचनम्** :- चरलग्नविषये वैशिष्ट्यं ज्ञापयन् अच्युतदैवज्ञः कथयति यद्- चरलग्नस्य प्रारम्भः त्रैलोक्यमोहनकरीनाड्याः पूर्वभागे भवति तदा शुद्रजातकस्य जन्मः सम्भवति तथापि सः जातकः सदा सर्वदा सुखी जीवनं जीवति तथा तस्य मातुः चतुर्थसन्तानरूपेण जन्म लभते । अत्र नाड्याः पूर्वभागस्य प्रभाव: चरलग्नविषये प्रस्तुतो वर्तते ।

**सप्तमांशे मेषलग्ने तु पूर्वे भागे प्रजायते ।**

**वैश्यजन्मा सुखी नित्यं कुजत्रिशांशजातकः ।।**

**अर्थः** :- मेषलग्ने ९ (नवमनाडी) तथा च १०३ (त्र्यधिकशततमनाडी) समाना वर्तेते पूर्वकलात्मकभागे वैश्यजातकस्य जन्मः भवति चेत् सः सदा सुखी तथा तस्य जन्म मङ्गलस्य त्रिंशांशे भवति ।

**विवेचनम्** :- वैश्यजातकस्य मेषलग्ने सप्तमी तथा १०३ तमनाडी समाना, अतः मेषलग्नस्य पूर्वकलात्मकभागे जन्म भवति चेत् सदा सुखी भवति, तथा सः जातकः मङ्गलस्य त्रिशांशे जन्ममवाप्नोति ।

**निर्मलांशे पूर्वभागे सप्तमे देवपूजित: ।**

**सत्कथा प्रियवान्नित्यं धर्मशास्त्रपुराकथित् ।।**

**अर्थः** :- ९० तमनिर्मला नाड्याः पूर्वार्द्धे यदि तुला लग्नस्य प्रारम्भो भवति चेत् एतादृश: जातकः सदा धर्मशास्त्राणि, पुराणानि तथा ईश्वराभिमुखसत्कथासु रुचियुक्तः तथा स्वाध्यायरतो भविष्यति ।

**विवेचनम्** :- जातकस्य जन्म तुलालग्ने तथा लग्नस्य प्रारम्भो निर्मलानाड्याः पूर्वभागे भवेत् चेत् जातको धर्मशास्त्र-पुराणादिविषयाणामभ्यास कर्ता तथा ईश्वरकथासु रुचियुक्तो भवति ।

**६.६ स्थिरलग्नविचारः :-**

स्थिरलग्न अर्थात् लग्ने वृषभः, सिंहः, वृश्चिकः तथा कुम्भलग्नो भवति चेत् तानि लग्नानि स्थिरलग्नानि कथ्यन्ते । तस्मिन्विषये एकमुदाहरणं देवज्ञअच्युतेन दत्तमस्ति, उदाहरणमिदं दुर्धरानाड्याः परिप्रेक्षे ज्ञास्यामः ।

**दुर्धरांशकगे जीवे शनिसंयुत्तवक्षिते ।**

**स्थिरलग्ने प्रजातस्य ज्येष्ठभ्रातृ विनाशनम् ।।**

**अर्थः** :- कुम्भलग्नं दुर्धरानाडीतः आरभते, तथा लग्ने शनि-गुरोः युति वा दृष्टिर्भवति चेत् तस्य जातकस्य ज्येष्ठः बन्धोः मृत्युः भवति ।

**विवेचनम्** :- कुम्भराशेः स्थिरलग्ने शनिः भवति तथा लग्नस्य प्रारम्भो दुर्धरानाडीतः भवति तथा शनिः गुरुणा सह दृष्टिः युतिर्वा धारयति तर्हि जातकस्य ज्येष्ठबन्धोः वा गुरुबन्धोः मृत्युः भवति ।

गुरुः ज्येष्ठबान्धवं सूचयति तथा शनिः यमं सूचयति । यदि गुरोः शनिना सह सम्बन्धो भवति चेत् यमेन सह सम्बन्धः, अर्थात् जातकस्य मृत्युः भविष्यति । अत्र प्रदत्तश्लोके दुर्धरानाड्याः प्रारम्भः कुम्भलग्ने दर्शितः वर्तते ।

**६.७ द्विस्वभाव लग्नविचारः :-**

द्विस्वभाव लग्नमर्थात् ,लग्ने मिथुन कन्या धन तथा मीनराशेः लग्नं भवति चेत् तानि लग्नानि कथ्यन्ते । अत्र द्विस्वभावलग्नमुपरि एकमुदाहरणम् देवज्ञ अच्युतेन दत्तमस्ति , तत् विषये वसुधा नाड्याः परिप्रेक्षे ज्ञास्यामः ।

**वसुधांशे पदे भागे लाभेशे कुजवीक्षिते ।**

**मीनलग्ने प्रजातस्य पित्रार्जितसुभाग्यवान् ।।**

**अर्थः** :- यदि जातकस्य जन्म वसुधानाड्याः उत्तरभागे मीनलग्ने प्रारभ्यते तथा च कुण्डल्याः लाभेशं मंगलं पश्यति चेत् जातक: पित्रार्जितधनात् सुभाग्यवान् भवति ।

**विवेचनम्** :- यदि जातकस्य जन्म वसुधा अर्थात् स्वद्विभावराशेः ९६ तमनाडी वा नाडीक्रमे या नाडी प्रथमा आगच्छति तस्याः उत्तरार्धे मीनलग्नस्य प्रारम्भो भवति तस्यां कुण्डल्यां लाभभुवने मकरराशिः समागच्छेत् तथा अस्याः राशेः स्वामी शनिः भवेत् तथा तं भौमः अर्थात् द्वितीयेश:(धनेश:), नवमेश:(भाग्येश:) वा भूत्वा पश्यति तदा तादृशाः जातकाः पित्रार्जितधनात् भाग्यशालिनः भवन्ति तथा समाजे भद्रस्वरुपमपि धारयन्ति ।

अत्र वसुधानाडी वर्णनं विद्यते, नाडीचक्रे सा प्रथमानाडी गण्यते किन्तु द्विस्वभावराशेः लग्ने सा ७६तमक्रमात् ७६ तमक्रमे समागच्छति, अर्थात् द्विस्वभावलग्नस्य प्रारम्भः यदि ७६ तमनाड्याः परभागे वा उत्तरार्द्धे स्यात् तर्हि एतादृशानां जातकानां पितृसकाशात् विपुललक्ष्मीप्राप्ति योग: सम्भवति तथा तेनैव कारणेन ते भाग्यशालिषु श्रेष्ठाः भवन्ति । एवं देवज्ञ-अच्युतेन द्वादशराशिनां प्रारम्भे

नाड्याः उत्तरार्द्धपूर्वार्द्धयोः अस्मिन् प्रकरणे घटस्फोटः कृतः तथा द्वादशराशिः चरस्थिरद्विस्वभावरूपेण विभागत्रयेषु विभाजितानि सन्ति इति वर्णनमपि कृतं वर्तते ।

## ६.८ नाड्यां पितृभावः :-

वयं जानीमहे यज्जातकस्य जन्मकुण्डल्यां पञ्चमभावः सन्तानभावः गण्यते, तथा तस्मात् पञ्चमभावः सन्तानस्य सन्तानभावः अर्थात् (पौत्रस्य,पौत्र्याः वा)भावः गण्यते । जन्मकुण्डल्यां ज्योतिषशास्त्रस्य सामान्यनियमानुसारं लग्नभावं तनुभावं कथ्यते । व्यक्तेः सम्पूर्णज्ञानं तस्य प्रथमभावात् भवति अतः लग्नभावं व्यक्तेः भावं वा व्यक्तित्वस्य भावमपि कथ्यते । यदि वयं व्यक्तिं कुण्डल्याः प्रथमभावे स्थापयामश्चेत् तस्य जन्मकारणं तस्मात् पञ्चमभावतः पश्येम । अस्मिन् न्याये जन्मकुण्डल्याः नवमस्थानं जातकस्य जनकस्य स्थानं गण्यते । कारणं नवमस्थानात् प्रथमभावः व्यक्तिभावं वर्तते सो भावः पञ्चमो वर्तते ।

पञ्चमो भावः उदरस्य गण्यते तथा उदरे भोजनस्य पाचनं भवति । पाचनं एका प्रक्रिया वर्तते । अतः नवमभावस्य प्रक्रियायाः भावः वर्तते । यदि प्रथमभाव: प्रक्रियायाः ।

भावः पञ्चमः भवेत् तथा सः संतानभावः भवेत् तर्हि नवमभावस्य पञ्चमो भावः अर्थात् प्रथमोभावः नवमभावस्य प्रक्रियायाः भावः भवति , तथा नवमभावस्य सन्तानभावः भवति ।

एवं यदि नवमभावं पिता मन्यामहे चेत् प्रक्रियान्ते अस्माकं प्रादुर्भावः भूतः तत् प्रक्रियायाः सर्जकभावः नवमोभावः जातकस्य कुण्डल्यां स्वस्यार्थम् जातः इति

परिगण्यते। एवं अस्मान् यः संस्कारः या प्रवृतिः या विशिष्टता या प्रक्रिया वा अस्मान् एक निश्चित स्वरुपे समाजसमक्षम् स्थापनाय समक्षम् भावयति तस्याः प्रक्रियायाः सर्जकः नवमभावे विद्यते । अतः भारतीयज्योतिषशास्त्रस्य सामान्य नियमानुसारं नवमभावः जातकं जन्मतः पालयित्वा एक निश्चितव्यक्तित्वं प्राप्येत् तावत् काल पर्यन्तं सतत प्रक्रियायाः प्रहरी भूत्वा पितापूर्वकं प्रवृत्यर्थं गण्यते ।

मातुः भावः चतुर्थभावः वर्तते। तस्मिन् न्याये समेऽपि भावेभ्यः सप्तमो भावः तस्य पतेः वा पत्न्याश्च भवति । न्यायेऽस्मिन् मातुः पति दशमेभावे आगच्छति , कारणं दशमोभावः चतुर्थभावात् सप्तमोभावः भवति । न्यायेऽस्मिन् दशमभावः मातुः पतिं विज्ञाय अस्माकं पितुर्भावः भवति ।

एवं नवमभावः अस्मासु संस्कारस्य सिंचनं , व्यक्तित्वस्य विकासं तथा सर्जनाय पितुः महत्त्वं वयं स्वीकुर्मश्चेत् नवमभावः अस्माकं संस्कारदाता पितुर्भावः गणयितुं शक्यते ।

किन्तु मातुः पतिं वयं पितृरूपेण स्वीकुर्मः चेत् दशमभावः पितुर्भावं भवति अर्थात् माता अस्माकं नैसर्गिकजन्मदात्री भूत्वा यं पतिं मन्यते सः अस्माकं नैसर्गिकपितुः गण्यते इत्थं नियमानुसारेण जन्मकुण्डल्याः दशमभावः पितुर्भावं भवेदिति । वयं इमं भावं नियमानुसारं पितुर्भावं कथयितुं शक्नुमः, किन्तु ज्योतिषशास्त्रस्य सिद्धान्तानुसारं यदि पिता बालकस्य जन्मदाता गण्यते तर्हि नवमभावात् पञ्चमभावः व्यक्तेः भवेत् चेत् नवमभावं व्यक्तेः पितुर्भावः गणनीयः । एवं सांविधिकपिता जन्मकुण्डल्याः दशमभावात् स्वीकर्तुं शक्नुमः सः अस्माकं जन्मदाता पिता, संस्कारदाता पिता, पालकपिता वा भवति किन्तु

व्यक्तित्वविकासमानपितुः स्वरूपं तु नवमभावः भविष्यति । नाडीशास्त्रे पितुः कृते नवमस्थानं दृश्यते । तस्य कृते अधोलिखितानि सूत्राणि पर्याप्तानि सन्ति ।

यतो हि प्राचीनशास्त्रेषु तथा नाडीग्रन्थेषु पितृभावविषये ऋषिमुनिभिः गहनाभ्यासः कृतो वर्तते । तदर्थं विविधग्रन्थेषु दत्तसूत्रेभ्यः कानिचन् सूत्राणि अर्थविवेचनाभ्यां द्रक्ष्यामः । “नवमेन तदीशेन स्वपिता जन्मविदुः”।चन्द्रकलानाड्यां अस्यसूत्रस्य आधाराय द्वितीयमिदं सूत्रं वर्तते ।“कुग्रामवासी स्वपिता नीचांशे भाग्यनाथके” सूत्रद्वयेषु प्रथमसूत्रं ज्ञापयति– नवमभावात् तथा तस्याधिपतितः कुण्डलीद्वारा पितुः जन्मलग्नं जानीयम् एवं सूत्रमिदं पितृभावविषये नवमभावं प्रस्तौति ।

द्वितीयसूत्रं दर्शयति- नवमेशः नीचराशौ भवति चेत् तदा जातको निम्नप्रकार(कु)ग्रामे वसो भवति । अत्र पितुर्विचारः जन्मकुण्डल्याः नवमभावस्य स्वामितः अर्थात् नवमभावात् कृतो वर्तते । इत्थं पितुः कृते जन्मकुण्डल्यां नवमस्थानं दर्शितमस्ति । चन्द्रकला नाड्याम् अग्रे गत्वा अधस्तनश्लोकः द्रष्टव्योऽस्ति-

**पितृक् महद्दिषेः मन्दे शुभद्वयसमन्विते ।**

**निर्मलांशे पूर्वभागे निर्मलः स्वपितामहः ।।**

पितामहस्थानस्याधिपतिः शनिः द्वयोः शुभग्रहयोः समन्वितो भविष्यति तथा निर्मलानाड्याः पूर्वभागे जन्मो लप्स्यति चेत् पितामहो निर्मलो भवति । नवमभावात् नवमभावः अर्थात् पञ्चमभावः तस्य पञ्चमभावस्य स्वामी शनिः च ।

अनया रीत्या पितुः कृते जन्मकुण्डल्याः नवमभावदर्शनाय चन्द्रकलानाड्याः सूत्राणि दृश्यन्ते । अस्मिन् परिप्रेक्षे पराशरमुनिना बृहत्पाराशरहोराशास्त्रस्य

भाग्यभावस्य चतुर्थश्लोके पितृभावं ज्ञापयन् निर्धनपितृयोगाय अधोलिखितसूत्रं प्रस्तुतम्-

**भाग्यस्थानात् द्वितीये वा सुखे भौमसमन्विते ।**

**भाग्येशे नीचराशिस्थे पिता निर्धन एव हि ।।**

यदि भाग्यभावात् द्वितीये अर्थात् जन्मकुण्डल्याः दशमस्थाने वा लग्ने भौमः स्यात् तथा नवमभावस्य स्वामी नीचराशौ उपविष्टः स्यात् चेत् जातकस्य पिता निर्धनो भवति । उपर्युक्त सूत्रस्यार्थे भाग्यभुवनात् द्वितीये भौमः वा नवमभावस्य स्वामी नीचराशौ स्यात् चेत् पिता निर्धनो वा द्ररिद्रो भवति, अत्र पितुः दरिद्रता प्रस्तुतसूत्रे वर्णिताऽस्ति ।

इत्थं नाडीग्रन्थेषु प्राचीनहोराग्रन्थेषु च नवमभावमेव पितृभावं गण्यतेति । अतः पितुः विचारकाले नवमभावं न विस्मराम इति ।

समाजे प्रचलनमस्ति यत्- जन्मकुण्डल्याः दशमस्थानं पितु: स्थानं वर्तते, किन्तु शास्त्रेषु सद्भिः(ज्योतिर्विद्भिः) जन्मकुण्डल्याः नवमस्थानमेव पितुर्स्थानं ज्ञापितम् । शास्त्रार्थसमये दशमस्थानं पितुः स्थानं एतदर्थं भवति यत् तत् स्थानं मातुः स्थानात् सप्तमस्थानं वर्तते । यतो हि नाडीशास्त्रेषु श्वसुरस्य स्थानं तृतीयस्थानं वर्तते तदनुसारं विचारं कुर्मः तर्हि पत्नीस्थानं सप्तमं तथा तस्मात् स्थानात् नवमस्थानम् अर्थात् तृतीयस्थानं श्वसुरस्थानं गण्यामहे चेत् श्वशुरः तस्याः पत्न्याः पिता गण्यते । इत्थं तृतीयस्थानं सप्तमस्थानात् नवमस्थानं वर्तते अतः पत्न्याः पितुः स्थानं भवति । एवं विचारस्यामश्चेत् कुण्डल्याः नवमस्थानं जातकस्य पितु: स्थानं भवति ।

शास्त्रसिद्धान्तयोः समन्वयः कुर्मः चेत् नवमस्थानं पितुः नैसर्गिकस्थानं वर्तते, तथा हि मातुः नैसर्गिकस्थानं पितुः स्थानात् सप्तमस्थानं भवति अनया रीत्या पितुः परिचयं माता कारयति, अतः सांविधिकपितुः दशमस्थानं वर्णितं किन्तु नवमस्थानं तु नैसर्गिकतया पितुरेव गण्यते, यस्य नाडीशास्त्रे अत्र-तत्र-सर्वत्र उपयोगः दृश्यते ।

नाडीज्योतिषे फलादेशविषये एवं च समग्रदेशे ज्योतिषशास्त्रस्य फलादेशस्तु समानरीत्या क्रियते किन्तु नाडीशास्त्रस्य कानिचन् सूत्राणि तथा श्लोकाः शुभाशुभफलाभ्यां कृते शनेः महत्वं ददन्ति । अतः नाडीज्योतिषस्य फलादेशे शनिविषयः विचारः अत्यन्तावश्यको वर्तते ।

चन्द्रकला नाड्याः सहस्रश्लोकेषु शनिविषये भारपूर्वकमुक्तमस्ति यत्– नाडी शास्त्रे शनेः अधिकं महत्त्वं वर्तते कारणं यत् शनिः प्रत्यक्षफलादेशप्रदः वर्तते । अतएव शुभाशुभफलादेशकर्तुं ज्योतिषरसिकानां कृते शनिविषये तथा शनिगोचरफलविषये अभ्यासः उपयोगी भवेत्तदर्थं निम्नरूपेण शनेः फलवर्णनं प्रस्तुतमस्ति ।

पूर्वे वयं नाडीज्योतिषे राशिं १५०भागे संस्थाप्य, प्रत्येक नाडीनां नामानि ज्ञातवन्तः । इमाः नाडयः तेषां नामानुसारं जातकाय फलं ददन्ति । चन्द्रस्य नाडी जातकं प्रकृतिः वा स्वाभाविकतां यच्छति, एवम् नाडीज्योतिषे राशेः फलमपि वयं विचारयितुं शक्नुमः ।

पूर्वप्रकरणे वयं द्वादशभावानां फलं ज्ञातवन्तः तथा प्रकरणेऽस्मिन् जन्मकुण्डल्याः नवग्रहाः तथा तेभ्यः प्रदत्तविषयाणां विषयेऽपि अभ्यासः कृतः ।

तद्वदेवात्र शनेः द्वादशभावेषु भ्रमणविषये, मानवजीवने शनेः प्रभाव: कीदृशो भवेत् तथा च गोचरोऽपि शनिः कीदृशं फलं प्रददाति इति विचारः प्रस्तुतोऽस्ति ।

## ६.९ नाडीग्रन्थानुसारेण नवमांशस्य गोचरग्रहस्य परिभ्रमणम् :-

चन्द्रकलानाडीग्रन्थे नवांशविषये गोचरभ्रमणविषये च वर्णितमस्ति । तस्याधारेणैवात्र जातकस्य जीवने कदा घटनाक्रमः परिर्वर्त्यते तस्य निर्देशः गोचरग्रहानुसारमेव ज्ञातुं शक्यते । गोचरग्रहः यदा ३.२० अंशोपरि भ्रमणं कुर्वन्ति (विशेषतः- मन्दगतियुक्ताः शनि-गुरु-राह्वादिग्रहाः) तदा किं फलं निर्देशितं इति प्रस्तूयते ।

(जन्मकाले चन्द्रः यस्मिन्नक्षत्रे भवति तस्य नक्षत्रस्य प्रथमचरणं तारांशमुच्यते, तथैव प्रथमनवनक्षत्राणि जन्मनक्षत्राणि, अनन्तरम् अन्यानि नवनक्षत्राणि कर्मनक्षत्राणि तथा चान्यानि नवनक्षत्राणि आधाननक्षत्राणि कथ्यन्ते) । इत्थं यदि जन्मनक्षत्रं स्वाती भवेत् तदा स्वातीतः नवनक्षत्राणि क्रमशः जन्मतारांश, सम्पत्तारांश, विपत्तारांश, क्षेमतारांश, प्रत्यरितारांश, साधकतारांश, वधतारांश, मैत्रीतारांश, परममैत्रीतारांश नाम्ना ज्ञायन्ते । यथा-

| | **जन्मनक्षत्राणि** | **कर्मनक्षत्राणि** | **आधाननक्षत्राणि** | **तारांशः -** |
|---|---|---|---|---|
| १ | स्वाती(२ चरण) | शततारा(२ चरण) | आर्द्रा(२ चरण) | जन्मतारांश: |
| २ | विशाखा(२ चरण) | पूर्वाभाद्रपद(२ चरण) | पुनर्वसु(२ चरण) | सम्पत्तारांश: |
| ३ | अनुराधा (२ चरण) | उत्तराभाद्रपद(२ चरण) | पुष्य(२ चरण) | विपत्तारांश: |
| ४ | ज्येष्ठा(२ चरण) | रेवती(२ चरण) | श्लेषा(२ चरण) | क्षेमतारांश: |
| ५ | मूल(२ चरण) | अश्विनी(२ चरण) | मघा(२ चरण) | प्रत्यरितारांश: |
| ६ | पूर्वाषाढा (२ चरण) | भरणी(२ चरण) | पूर्वाफाल्गुनी(२चरण) | साधकतारांश: |

| | | | | |
|---|---|---|---|---|
| ७ | उत्तराषाढा(२ चरण) | कृत्तिका(२ चरण) | उत्तराफाल्गुनी(२चरण) | वधतारांश: |
| ८ | श्रवण(२ चरण) | रोहिणी(२ चरण) | हस्त(२ चरण) | मैत्रीतारांश: |
| ९ | धनिष्ठा(२ चरण) | मृगशीर्ष(२ चरण) | चित्रा(२ चरण) | परममैत्रीतारांश: |

**विपत्तारांशगे मन्दे गोचरे शत्रुनिग्रहः ।**

**सम्पत्तारांशगे भीतिर्वितत्प्राणभयं महत् ।।**

(चन्द्रकलानाडीग्रन्थः, भागः-२, श्लो.-३०१८, पृ.-३२)

अर्थात् यदा गोचरे शनिः विपत् तारांशे भ्रमणं करोति तदा जातकस्य शत्रुहस्तेन पराजितो भवति वा बन्धनं प्राप्नोति ।

तद्वदेव यदा शनिः सम्पत् तारांशे भ्रमणं करोति तदा जातकः भयमाप्नोति वा सः जातकः प्राकृतिकाऽऽपदाग्रस्तो भवति ।

**क्षेमेव्याकुलकार्याणि स्वराज्ये कलहं व्यथाम् ।**

**प्रत्यरे तु मनस्तापं पाण्ड्यभूपतिविग्रहम् ।।**

(चन्द्रकलानाडीग्रन्थः, भागः-२, श्लो.-३०१९, पृ.-३२)

यदा शनिः गोचरे क्षेमतारांशोपरि भ्रमणं करोति तदा तस्य जातकस्य राज्ये विकटा स्थितिर्भविष्यति । मनसि च परितापमपि भवति ।

**मन्दलाधिपतेर्मृत्युं बन्धुक्लेशं विनिर्दिशेत् ।**

**आधानजन्मकर्मर्क्षे पापक्रान्ते स्थिते सति ।।**

(चन्द्रकलानाडीग्रन्थः, भागः-२, श्लो.-३०२१, पृ.-३२)

**राजद्वारकलापेन व्याकुलं मनुरब्रवीत् ।**

**तदभावे देहजाड्यं स्वजनानामुपद्रवम् ।।**

(चन्द्रकलानाडीग्रन्थः, भागः-२, श्लो.-३०२२, पृ.-३२)

यदा शनिः प्रत्यरितारांशोपरि भ्रमणं करोति तदा अन्यराज्यैः सह युद्धं मानसिकपरितापं च भवति । तथा च स्वमित्रैः, स्वजनैः सह क्लेशं वैमत्यं वा भवति। स्वमित्रराज्ञः निधनं भवति अथवा मित्र राजा दुःखमवाप्नोति ।

**६.९.१ शुभग्रहाणां गोचरफलम् :-**

**शुभग्रहा क्रान्तकाले शुभं भवति नित्यशः ।**

**पापाक्रान्ते मनस्तापं ग्रहोक्तगुणभार्गतः ।।**

(चन्द्रकलानाडीग्रन्थः, भागः-२, श्लो.-३०२३, पृ.-३२)

यदा शुभग्रहाः क्षेमतारांशोपरि परिभ्रमणं कुर्वन्ति तदा प्रत्यह्निः शुभप्रसङ्गाः, नूतनगृहलाभः, कर्मक्षेत्रे प्रगतिः, धनाप्तौ वृद्धिः, धार्मिकप्रसङ्गे वायात्रायां गमनं, भूमेः वा गृहलाभः, नूतनधनप्राप्तिविषयकस्रोतांसि, उच्चपदं, प्रतिष्ठावृद्धिः तथा च सन्तानोत्पत्तिर्जायते । किन्तु अशुभग्रहाः क्षेमतारांशोपरिभ्रमणं कुर्वन्ति तदा दुखम्, अपमानं, वृतौ हानिः, दुश्मनानां वृद्धिः कष्टं च, स्वजनैः सह विरोधः, पदहानिः, रोगाणां वृद्धिः, भयं, पराजयः, शोकाप्तिश्चोत्पद्यते ।

तद्वदेव सूर्यस्य, भौमस्य, शनेः, राह्वोश्च गोचरभ्रमणमनिष्टकारकं भवति तथा च चन्द्रस्य, बुधस्य, गुरोः शुक्रस्य च भ्रमणं शुभप्रदं भवति ।

**६.१०गोचरस्थशनेः द्वादशभावेषु भ्रमणफलम् :-**

वयं जानीमः यत् सर्वेषु ग्रहेषु शनिः मन्दो वर्तते, सः एकराशौ सपादवर्षद्वयं वा सार्धवर्षद्वयं वसति, अतः शनिफलं मानवजीवने प्रभावमुत्पादयति ।

जन्मकुण्डल्यां सूर्यचन्द्रौ जीवनदातारौ स्तः तथैव शनिः जीवनहर्ता कथितो वर्तते । यथा जातक: जीवने शुभग्रहाणां शुभफलानि प्राप्यते तद्वदेवाशुभग्रहाणामशुभफलं प्राप्यते, तदनुसारेण जातकस्य जीवनं शनिवशात् पीड़ायुक्तं वा कष्टकरं भवति । जीवने हानेः सर्जनं पापग्रहाणां कार्यं वर्तते शनि: अस्माकं शास्त्रे प्रबलः पापग्रहः कथितः अतः शनेः फलविषये विचारः अत्यावश्यकोऽस्तीति मे दृढं मतम् ।

यदा यदा शनिः जन्मराशितः प्रथमे, द्वितीये, द्वादशभावे च परिभ्रमणं कृति तदा जातकस्य जीवने सार्धसप्तवर्षं यावत् पनोति समागच्छति, तेन कारणेन मानवो जीवने हतप्रभो भूत्वा सर्वकार्येषु निष्फलो भवति । शने: कालोऽयं मानवस्य जीवनस्य हीनत्वं सूचयति । तदुपरि सार्धद्विवर्षपर्यन्तं शनेः लघुपनोतिकालोऽपि वर्णितोऽस्ति जातकशास्त्रेषु तदनुसारेण जीवने बहुसमस्यायाः उत्पत्तिः तथा च कष्टप्रदजीवनस्य सङ्केतोऽपि बहुत्र प्राप्यते ।

शनेः गोचरफलविषये वयं अतीव भ्रमिताः भवामः कारणं यत् शनेः गोचरभ्रमणकालः प्रत्येकराशौ सार्धद्विवर्षपर्यन्तं भवति किन्तु नाडीग्रन्थेषु शनिः

यदा कुण्डल्याः भिन्न भिन्न भावोपरि परिभ्रमणं काले यदा यदा कारकग्रहोपरि गच्छति वा परिभ्रमणं करोति तदा, एवञ्च तेषां त्रिकोणांशात्मकरीत्या परिभ्रमणं भवति तदा, वा शनेः कस्मिन्नपि भावादष्टमस्थानाधिपतेः वा तस्य त्रिकोणांशात्मकरीत्या भ्रमणं भवति तदा यं फलं शनिः ददाति तं फलं नाडीशास्त्रे भिन्न-भिन्नरीत्या प्रदत्तं वर्तते ।

### ६.११ नाड्याऽऽधारेण नवांशस्य विशिष्टमध्ययनम् :-

दक्षिणभारते २०विंशत्यधिकनाडीग्रन्थाः विरचिताः सन्ति तेषु अष्टाधिकग्रन्थोपरि श्री सी.एस.पटेलमहोदयेन विशदमध्ययनं कृत्वा विशेषतः बुधनाडीग्रन्थः(काका भुजनदर) वर्तते, तत्र लेखकेन नवांशोपरिमहत्त्वपूर्णज्ञानं प्रदत्तमस्ति। भूतकाले प्रत्येकरचानाकारेण नवांशवर्गस्य प्रयोगः स्वस्यपुस्तके कृतो वर्तते । यथा- ध्रुवनाडी विषये लेखको जयमुनिः ४२ द्विचत्वारिंशत् प्रकरणेषु प्राधान्येन भावात्मकनवांशविषये लिखितमस्ति । तद्वदेव 'जातकसत्यचार्यम्'(मूलग्रन्थः संस्कृतः- सत्यसंहिता) नामाभिधग्रन्थे सी.जे.राजनमहोदयेन ध्रुवनाडीविषये तेलगुभाषायां ४५० श्लोकाः रचिताः सन्ति । भार्गवनाडीद्वारा भावाधारेण स्थितग्रहः नवांशे कुत्रस्थितो वर्तते तस्याधारेण नवांशफलज्ञानमनेन भवति। चन्द्रकलानाडीद्वारा नवांशे स्थितग्रहः कस्मिन् नवांशे वा तस्य ग्रहस्य त्रिकोणराशिः (५-९राशिः) का वर्तते तस्य ज्ञानं भवति । प्रस्तुतग्रन्थे अष्टांशः, पुष्करांशः, योगांशः, विकटांशः इत्यादिनाडीनामधिकं महत्त्वं वर्णितमस्ति । (श्री टी. रामकृष्णेन नाडीग्रन्थः तथा नाडीज्योतिषविशिष्टता आधारित सप्तलेखाः प्रकटिकृताः सन्ति) इत्यादि । बुधनाडीविषये वर्णितं यत्- एक नवांशमर्थात् एकवर्षम् इत्युक्त्वा नवांशफलं प्रतिपादितमस्ति । इत्थं

ज्योतिषशास्त्रस्य विख्यातलेखकेभ्यः नवांशाधारित नाडीविषयकपुस्तकानि लिखितानि ।

**ध्रुवनाडी :-**

ध्रुवनाडीविषये सत्यसंहिताग्रन्थे लिखितमस्ति यत्- प्रत्येकभावस्य स्वामी कस्मिन् भावस्थो (अर्थात् द्वादशलग्नानि+द्वादशभावाः=१४४ योगाः) भवति तदनुसारं फलं वर्णितम् । यथा- उदा. जन्मकुण्डल्यां तृतीयभावस्य स्वामी नवांशे नवमभावे स्यात्तदा भ्रातृकृते तथा च पितृकृते शुभफलदाता भवति, किन्तु यदि नवमभवाधिपतिः निर्बलो भवेत्तदा जातक: पितृणा साकं भिन्नं मतं (वैमत्यं)धारयति । तद्वदेव यदि तृतीयभावाधिपतिः नवांशे षष्ठाष्टमद्वादशभावस्थो स्यात्तदाऽपि उपर्युक्तं फलं प्राप्नोति जातकः ।

**पुष्करनवांशः-** कस्मिन्नपि जातकस्य उदितनवांशः यदि पुष्करनवांशः भवेत् तदा तस्य जीवनमुन्नतं भवति ।

**गुरोः जन्मकुण्डल्यां नवांशस्थितिमवलोक्य वर्णितफलानि**

- उदा.- यदि जन्मकुण्डल्यां गुरुः दशमभावस्थो भूत्वा यदि सिंहनवांशे भवति तदा जातकः प्रधानो भवति ।

- यदि दशमस्थो गुरुः धनुनवांशे तिष्ठेत् तदा जातको उच्चविद्यायुक्तो भवति ।

- यदि दशमस्थो गुरुः बुधस्य (३,६) तथा शुक्रस्य (२,७) शत्रुनवांशे तिष्ठेत् तदा जातको विद्याविहीनो दुःखी च भवति ।

- यदि दशमस्थो गुरुः भौमस्य (१,८) मित्रनवांशे तिष्ठेत् तदा जातकः सर्वकारस्य विविधोच्चपदेषु स्थित्वा प्राधान्यमावहति ।

- यदि दशमस्थो गुरुः कुम्भनवांशे तिष्ठेत् तदा जातकः धैर्ययुक्त: किन्तु कर्कशवाचा युक्तो भवति ।

- यदि दशमस्थो गुरुः मकर(नीच)नवांशे तिष्ठेत् तदा जातकः पापी(पापकर्मकर्ता) भवति ।

- यदि दशमस्थो गुरुः कर्क(उच्च)नवांशे तिष्ठेत् तदा जातकः संस्कृतज्ञो (पण्डितो)भवति ।

- यदि दशमस्थो गुरुः स्व(मीन)राशौ तिष्ठेत् तदा जातकः अन्याजनेभ्यः आश्रयदाता भवति । इत्थं विविधस्थेनेषु गुरोः भिन्न-भिन्नफलं भवति । (गुरोः फलवर्णनं भार्गवनाडी-आधारित-अध्याये कृतमस्ति) ।

## ६.१२ नाडीग्रन्थेषु नवमांशानां वर्गीकरणम् :-

### ६.१२.१ स्वक्षेत्रनवांश:

यः ग्रहः स्वगृही तथा च स्वराशीनवांशयुक्तो भवति सः ग्रहः स्वक्षेत्रनवांशयुक्तो कथ्यते । यथा-

भौमः- मेषराशौ वृश्चिकनवांशे ।

बुधः- कन्याराशौ मिथुननवांशे ।

गुरुः- मीनराशौ धनुनवांशे ।

शुक्रः- तुला राशौ वृषभनवांशे ।

शनिः- मकरराशौ कुम्भनवांशे ।

शनिः- कुम्भराशौ मकरनवांशे च ।

### ६.१२.२ योगांश:(राजयोगः)

यः ग्रहः स्वराशौ तथा च भाग्येशेऽपि भवति सः योगांशी कथ्यते । द्वादशराशीषु योगांशी ग्रहाः भवन्ति । यथा- भौमः मेषराशौ धनुनवांशे च अर्थात् २६०. ४० तः ३००.०० तथा च भौमः वृश्चिकराशौ कर्कनवांशे च तिष्ठति तदा वृश्चिकात् कर्कः नवमराशी भवति इत्थं भौमः योगांशी भूत्वा राजयोगं करोति ।

### ६.१२.३ विकटांशः

यः ग्रहः स्वराशौ स्थित्वा स्वस्य नीचनवांशस्थो भवति सः विकटाशयुक्तो कथ्यते । यथा- सूर्यः सिंहराशौ स्थित्वा तुलानवांशयुक्तो भवेत् तदा सः विकटांशे वर्तते । विकटांशयुक्तो ग्रहः अशुभं (विकटं)फलं ददाति ।

### ६.१२.४ भावोत्तम:

यः ग्रहः जन्मकुण्डल्यां यस्मिन् भावे भवति तस्मिन्नेव भावे नवांशेऽपि भवेत् तदा सः भावोत्तमः कथ्यते । भावोत्तमग्रहो शुभं फलं प्रददाति ।

### ६.१२.५ ओजमांश:

पुरुषराशीनां (१,३,५,७,९,११) नवांशम् ओजमांशनवांशं कथ्यते ।

### ६.१३ मेषादिनवांशाः

नवांशस्येदं वर्गीकरणं सामान्यं वर्तते । अनेन जातकस्य वर्तनं, जीवनध्येयं, कार्यपद्धतिविषये च ज्ञानं भवति । यथा-

- मेषनवांशे जातकः चौरो भवति ।
- वृषभनवांशे जातकः सुखमयजीवनयापनं करोति ।
- मिथुननवांशे जातकः विद्यायुक्तो भवति ।
- कर्कनवांशे जातकः धनवान् भवति ।
- सिंहनवांशे जातकः राजा भवति ।
- कन्यानवांशे जातकः समाजे महत्त्वं धारयति ।
- तुलानवांशे जातकः वीरः शान्तिप्रियश्च भवति ।
- वृश्चिकनवांशे जातकः कर्मवीरो भवति ।
- धनुनवांशे जातकः भृत्यो भवति ।
- मकरनवांशे जातकः पापकर्मा भवति ।
- कुम्भनवांशे जातकः क्रूरो भवति ।
- मीननवांशे जातकः भयविहीनो भवति ।

किन्तु उदितनवांश: वर्गोत्तमनवांशं स्यात्तदा जातकः उपर्युक्तफलं निर्देशितं तस्य प्राधान्यं धारयति। यथा- चौरः भवति इति फलं निर्देशितं वर्तते तस्मिन् स्थाने जातकः चौराग्रगण्यो (प्रधानो)भवति। तद्वदेवान्यफलान्यपि ज्ञेयानि।

## ६.१३.१ भावमध्यनवांश: :-

लग्नस्य नवांशम् उदितनवांश: वा लग्ननवांशनाम्ना ज्ञायते, तं नवांशं प्रथमभावस्य भावनवांशं कथ्यते । भावमध्यनवांशस्थितग्रहाणां फलं निम्नाङ्कितमस्ति-

-  यथा भौमः, तृतीयभावस्य मध्यबिन्दुनवांश: तृतीयभावाधिपतिश्च युग्मराशीनवांशे तिष्ठन्ति तदा जातकस्य बह्व्यः भगिन्यः भवन्ति।

-  सप्तमभावस्य मध्यबिन्दुनवांशं शुक्रयुक्तं तथा च द्वितीयभावस्य मध्यबिन्दुनवांशं शुक्रयुक्तं स्यात् तदा जातक अनेकभार्या युक्तो भवति।

-  पञ्चमभावस्य मध्यबिनुनवांशं शुक्रयुक्तं स्यात् तदा जातको बहु सन्ततियुक्तो भवति।

## ६.१३.२ पुष्करनवांश: :-

पुष्करनवांशस्योल्लेखः उपयोगः वा चन्द्रकलानाडी, ध्रुवनाडी, प्रश्नमार्गः तथा च विद्यामाधव्यम् ग्रन्थे कृतो वर्तते । सामान्यतया पुष्करनवांशस्योपयोगः मुहूर्तशास्त्रे शुभकार्येषु च भवति । प्रत्येकराशौ द्वौ नवांशौ भवतः तं पुष्करनवांशनाम्ना ज्ञायते। अर्थात् द्वादशराशीनां २४ चतुर्विंशतिनवांशाः भवन्ति

। पुष्करनवांशस्थितग्रहाः शुभं फलं ददति । विद्यामाधव्यम्, भागः-१, पृ.३०-३१ मध्ये वर्णितमस्ति यत्-

-  मेष-सिंह-धनुराशेः सप्तमनवांश:(तुलानवांश:) एवञ्च नवमनवांश: (धनुनवांश;) ।

-  वृषभ-कन्या-मकरराशीनां पञ्चमनवांश: (वृषभनवांश:) एवञ्च तृतीयनवांश: (मीननवांश:) ।

-  मिथुन-तुला-कुम्भराशीनां षष्ठनवांश: (मीननवांश:) एवञ्च अष्टमनवांश: (वृषभनवांश:) ।

-  कर्क-वृश्चिक-मीनराशीनां प्रथमनवांश: (कर्कनवांश:) एवञ्च तृतीयनवांश: (कन्यानवांश:) । उपर्युक्तनवांशाः पुष्करनवांशाः कथ्यन्ते । तेषु शुक्रस्य नवांश: (वृषभ-तुला), गुरोः नवांश: (धनु-मीन:), चन्द्रस्य नवांश: (कर्कः), बुधस्य नवांश: कन्या गण्यते । कोऽपि ग्रहः पुष्करनवांशे, स्वगृहस्थो, उच्चस्थो च भवति सः ग्रहः शुभफलदाता भवति । यथा-

-  शुक्रः- वृषभे तुलायां स्वगृही, मीने चोच्चस्थो भवति ।

-  बुधः- कन्यायां स्वगृही उच्चस्थो च भवति ।

-  चन्द्रः- कर्के स्वगृही, वृषभे चोच्चस्थो भवति ।

-  शनिः- तुलायामुच्चस्थो भवति ।

- गुरुः- धनुषि मीने च स्वगृही, कर्के चोचस्थो भवति ।
- भौमः- वृश्चिके स्वगृही, मकरे चोच्चस्थो भवति ।
- सूर्यः- सिंहे स्वगृही, मेषे चोच्चस्थो भवति ।

चन्द्रकलानाडीग्रन्थे पुष्करनवांशवर्णने लिखितमस्ति यत्- पुष्करनवांशस्थितग्रहः वर्गोत्तमग्रहतुल्यं फलं ददाति । यथा-

**केन्द्रत्रिकोणगे जीवे पुष्करांशे सुभाग्यवान् ।**

**षष्टाष्टमव्ययांशस्थे दुर्बले पुत्रशोकवान् ।।**

अर्थात् गुरुः जन्मकुण्डल्यां केन्द्रे (१,४,७,१०) अथवा त्रिकोणे (५,९) भावे तथा च पुष्करनवांशे भवेत् तदा जातको भाग्यवान् धनवान् च भवति । किन्तु स एव गुरुः षष्टाष्टमद्वादशभावे भवेत् तदा तद्विपरीतं फलं लभ्यते जातकः । तद्वदेव गुरुः मेषत्रिकोणे (मेष-सिंह-धनुराशौ), वृषभत्रिकोणे (वृषभ-कन्या-मकरे), मिथुनत्रिकोणे (मिथुन-तुला-कुम्भे), कर्कत्रिकोणे (कर्क-वृश्चिक-मीने) च पुष्करनवांशे भवेत् तदा क्रमशः १४ वर्षे, २१ वर्षे, २४ वर्षे ३१ वर्षे च शुभाशुभफलस्यारम्भो भवति ।

यदि जन्मकुण्डल्याः सूर्यतः शनिपर्यन्ताः सप्तग्रहाः पुष्करनवांशे भवेयुस्तदा जातकः जन्मत एव धनवान् (गर्भश्रीमन्तो)भवति । जीवनसर्वं सुखं च अवाप्नोति जातकः ।

तद्वदेव चन्द्रकलानाडीग्रन्थस्य प्रथमभागस्य पृष्ठक्रमाङ्कः २३९ अनुसारेण पुष्करनवांशस्य फलं निम्नानुसारं वर्णितं दृश्यते। यथा-

**पुष्करांशगते जीवे राज्येशे कुजवीक्षिते।**

**चम्पकांशे प्रजातश्च यावदायुष्यभाग्यवान्॥**

**पुष्करांशे गते जीवे रन्ध्रेशे स्वोच्चराशिगे।**

**त्रैलोक्यांशे प्रजातः स यावदायुष्यभाग्यवान्॥**

**पुष्करांशगते जीवे राज्येशे धनुराशिगे।**

**जीवे कुजयुते दृष्टे योगश्चामरसंज्ञकः।**

**चामरे योगजातस्य द्वाविंशाब्दात् परं सुखम्॥**

(चन्द्रकलानाडीग्रन्थः, भागः-१, पृ. २३९)

अर्थात् यदि गुरुः पुष्करनवांशे दशमभावाधिपतिर्भूत्वा भौमदृष्टः स्यात् तदा जातकः भाग्यवान् सुखयुक्तश्च भवति। श्लोकः-२६९९

अर्थात् यदि गुरुः पुष्करनवांशे, रन्ध्रेशे स्वोच्चराशिगे तथा च मकरे त्रिलोकनाड्यंशे चोत्पन्नः जातकः जन्मतः मृत्युपर्यन्तं सुखं लभ्यते। श्लोकः- २७३७

अर्थात् यदि गुरुः दशमभावाधिपतिर्भूत्वा द्वितीयभावे पुष्करनवांशे भौमदृष्टियुक्तो भवति तदा चामरयोगोत्पद्यते। अनेन कारणेन योगेस्मिन्नुत्पन्नजातकः २२ वर्षत एव जीवनस्य सर्वसुखानि लभ्यते। श्लोकः-२४२७

उदा.- एन.टी.रामारावमहोदयस्य जन्मकुण्डल्यां गुरुचन्द्रौ (गुरुः मीननवांशे, चन्द्रश्च तुलानवांशे)उदितनवांशे वर्तेते । तदुपरान्त केतुः, सूर्यः, बुधश्च पुष्करनवांशे वर्तन्ते, इत्थं पञ्चग्रहाः उदिते पुष्करनवांशे च वर्तन्ते, तेन कारणेन रामारावमहोदयस्य जीवनं प्रसिद्धकार्यैः परिपूर्णं सुखमयं चासीत् । अन्यान्युदाहरणानि सन्ति- अमिताभबच्चनस्य, वी.पी.सिंहमहोदयस्य, सरदारवल्लभभाई पटेलमहोदयस्य जीवनसुखं प्रसिद्धिश्च उपर्युक्तयोगाऽऽधारेणैव दृश्यते ।

**६.१४ खरनवांशाऽऽधारेण भविष्यत्कालीनं (६४तमनवांशस्य)फलम् :-**

खरनवांशस्योल्लेखः देवकेरलम्(चन्द्रकलानाडीग्रन्थः), बृहत्पाराशर-होराशास्त्रे, जातकपारिजाते, होरारत्नग्रन्थे च वर्णितमस्ति ।

जन्मकुण्डल्यां केचनबिन्दवः संवेदनापूर्णाः भवन्ति । यथा- यदा संवेदनापूर्णबिन्दोरुपरि गोचरे शनिरायाति तदा जातकस्योपरि नैकानि दुःखानि उत्पद्यन्ते । कोऽपि स्वजनस्य मृत्युः, मृत्युतुल्यं दुःखम् अथवा स्वस्यैव मृत्युर्भवति । एतादृशा: संवेदनापूर्णभागाः ६४तमनवांशनाम्नाभिधीयन्ते । तस्य कालः ३०.२० अंशपर्यन्तम् अर्थात् २०० कलापर्यन्तं भवति । अस्य भागस्य गणना लग्नतः वा चन्द्रतः भवति ।

प्रायोगिक ज्योतिष विचार (दशा-नवमांश-प्रश्नज्योतिष एक अध्ययन)नामाभिधग्रन्थस्य लेखकस्य अनुभवमाश्रित्य ग्रन्थस्यास्य पृ.स. ३१ अनुसारेण मया वर्णनमिदं कृतं वर्तते । यथा-

६४तमनवांश: अर्थात् जन्मकुण्डल्याः ६४ ३०.२० अंशाः=२१०० अंशाः जन्मलग्नतः अष्टमभावे पतति । इत्थं कस्यापि ग्रहाद् उपर्युक्तांशे अष्टमभावः आगच्छति तं ६४ नवांशं कथ्यते ।

- उदा.- श्रीमति इन्दिरागान्धी
- ज.दि.१९-११-१९१७,
- ज.स. २१-११,
- मृत्युः ३१-१०-१९८४ दिल्ली

जन्मलग्नं- कर्कः, लग्ने शनिः, द्वितीये भौमः, पञ्चमभावे सूर्य: बुधः च, षष्ठभावे शुक्रः राहु च, सप्तमे चन्द्रः, लाभभावे गुरुः तथा च द्वादशे केतुः वर्तते । इत्थं लग्नेशः चन्द्रः कुम्भनवांशे वर्तते, तस्य ६४तमः नवांश: मिथुननवांश: भवति । कुम्भराशिः कर्कलग्नतः अष्टमराशी अस्ति । तदनुसारं निम्नफलं जातम् ।

- गोचरे यदा शनिः १०-२९०-३२ (कुम्भस्य २९ अंशाः, ३२ कलायां) परिभ्रमणं कृतवान् तदा तस्याः मातुः निधनं जातम् ।

- जन्मकुण्डल्यां शनिः कर्कस्थो मकरनवांशस्थो च वर्तते, अतः तस्य ६४तमनवांशं मेषनवांशं भवति तथा तस्य-अष्टमराशीः कुम्भः भवति । इत्थं दिनाङ्कः-८-९-१९६० समये केतुः १०-२२०-८ परिभ्रमणं कृतवान् तदा तस्याः भर्तुः फिरोजगान्धीमहोदयस्य निधनमभवत् ।

- जन्मकुण्डल्यां बुधः तृतीयभावस्य द्वादशभावस्य च अधिपतिर्भूत्वा वृश्चिकराशौ १३०-१५ अंशस्थोऽस्ति, तस्य नवांशं तुला भवति, बुधतः ६४तमनवांशगणनया मकरनवांशमागच्छति, जन्मकुण्डली आधारेण वृश्चिकतः अष्टमभावः मिथुने आगच्छति, अनया रीत्या यदा मिथुनराशौ मकरनवांशात् २७-५-१९६४दिनाङ्के २-१००-३ अंशे राहोः परिभ्रमणं जातं तदा इन्दिरायाः पितुः जवाहरलाल नहेरुमहोदयस्य निधनमभवत् ।

- तद्वदेव हर्षलनामाभिधो ग्रहः मकरे २७०-२० अंशे कन्या नवांशे वर्तते, तस्य ६४तमनवांशं धनुनवांशं भवति, सिंहराशी मकरराशीतः अष्टमराशी भवति, गोचरे यदा शनिः तस्योपरिभ्रमणं कृतवान् (दिनाङ्कः-२३-३-१९८७, शनिः-४-२७०-२७) तदा तस्याः पुत्रस्य संजयगान्धीमहोदयस्य निधनं जातम् । तद्वदेव अमिताभबच्चनमहोदयस्य ६४तमनवांशस्य गणनया ज्ञातं यत्- जन्मकाले भौमः (५-२२०-४९) अंशस्थो वर्तते तस्य ६४तमनवांशपरिभ्रमणकाले २४-७-१९९२दिनाङ्के अकस्मात: सञ्जातः अर्थात् मृत्युतुल्यं कष्टमुत्पन्नम् ।

अस्मिन् विषये संशोधनस्यावकाशस्तु वर्तत एव, अतः ज्योतिर्विद्भिः निवेद्यते यत्- इत्थं नवांशाऽऽधारिताधिकं संशोधनं कृत्वा भविष्यत्कालीनज्योतिर्विदां कृते उपकारः विधातव्य इति ।

**६.१५ निधनांश-अष्टमांशयोर्मध्ये भेदः :-**

यदा जन्मकुण्डल्यां कोऽपि भावाधिपतिः स्वनवांशस्थो स्यात् किन्तु जन्मकुण्डल्यां सः ग्रहः अष्टम-नवांशस्थानाधिपो भवेत् तदा सः ग्रहो निधनाधिपतिः कथ्यते तथा तं नवांशं निधनांशं कथ्यते ।

उदा.- कर्कलग्नस्य जन्मकुण्डल्यां लग्नाधिपतिः चन्द्रो भवति, यदि सः कुम्भस्य कस्मिन्नपिनवांशे भवेत् तदा सः निधनस्थ इत्युच्यते, कारणं यत् कुम्भराशीः कर्कलग्नस्य अष्टमराशी भवति अतः चन्द्रः निधनांशः कथ्यते । यदा जन्मकुण्डल्यां कोऽपि ग्रहः तादृशराशौ तिष्ठेत् या राशी अष्टमस्थ राशी स्यात् तदा सः ग्रहः अष्टमस्थ इत्युच्यते ।

उदा.- जन्मकुण्डल्यां चन्द्रः तुला राशौ स्थित्वा वृषभनवांसस्थो स्यात् (तुला राशितः वृषभराशीः अष्टमराशी भवति) तदा चन्द्रः अश्तमस्थः तथा च वृषभनवांशं अष्टमांशं कथ्यते ।

**निष्कर्षः-** कोऽपि ग्रहः जन्मकुण्डल्यां निधनांशे भवेत् तदा तस्य जातकस्य कौटुम्बिकसदस्यस्य आकस्मिकनिधनं भवति । (चन्द्रकला नाडी, भाग-२, प्र.-१, श्लो.८०, पृ.-८६)

**६.१६ नीचनवांशस्थितग्रहफलम् :-**

जन्मकुण्डल्यां सत्यपि राजयोगे उत्तमं फलं दृष्टिगोचरं न भवति । कारणमिदमस्ति यत् जन्मपत्रे स्वगृहोच्चादिस्थः ग्रहः नवांशे नीचराशौ भवेत्तदा नीचस्यैव फलं विदधाति । यतो हि राशेर्नवांश: तद्राशितोऽधिको बली भवति । उक्तमपि-

**स्वोच्चे नीचनवांशके दुःखी नीचे स्वोच्चांशके सुखी ।**

**स्वांशे वर्गोत्तमे भोगी राजयोगी भविष्यति ।।**

## ६.१७ चरस्थिरराशयोरन्तिमनवांशेऽवस्थितग्रहफलम् :-

चरस्थिरराशयोरन्तिमनवांशेऽवस्थितोऽर्थात् त्रिंशदंशमितिरंशैरवस्थितो ग्रहः निबलो भवति। परञ्च द्विस्वभावराशिषु (मिथुन-कन्या-धनु-मीन) यदि इयमेव स्थितिर्भवेत्तदा ग्रहः वर्गोत्तमत्वात् बली भवति।

## ६.१८ राशितुल्यनवांशं नवांशतुल्यराशीः:-

मेषराशौ नवनवांशाः भवन्ति, अर्थात् मेषराशौ मेषनवांश:, वृषभराशौ मेषनवांश:, मिथुने मेषनवांश: इत्यादि। तद्विपरीतगणनया राशितुल्यनवांशाः भवन्ति । तत्र मेषराशौ मेषनवांशं वर्गोत्तमनवांशं कथ्यते । कर्कराशौ, वृश्चिकराशौमीनराशौ च मेषनवांशं न भवति । अर्थात् षड्राशीष्वेव एतादृशी स्थितिः भवितुं शक्यते। यथा-

२ ३ ५ ६ ७ ९ राशीः

१ १ १ १ १ १ नवमांशः।

इत्थं वृषभ-मिथुन-सिंह-कन्या-तुला-धनुषि च मेषनवांशं भवति । अनेन प्रकारेणान्यराशिष्वपि ज्ञातव्यम्।

उदा.- पटेलमहोदयस्य जन्मकुण्डली अनुसारेण गुरुः कुम्भस्थो मिथुननवांशे च वर्तते, तद्विपरीतस्थित्यां मिथुनराशौ कुम्भनवांशे च गुरुः द्वादशवर्षानन्तरमेव परिभ्रमणं करोति । इत्थं कुण्डली अनुसारेण दिनाङ्कः-९-९-१९८९ तः १-१०-१९८९ मध्य एव लेखकमहोदयः स्वस्य गृहस्याधिपतिरभवत्। जीवनस्यायं

प्रसङ्गः महत्त्वपूर्णो वर्तते । तद्वदेवयदा यदा गुरुः मिथुनराशौ कुम्भनवांशे च परिभ्रमणं कृतवान तदा तदा जीवने महत्त्वपूर्णप्रसङ्गानां सर्जनं जातम्।तथैव यदा जातकस्य जन्मकुण्डल्यांशनिः तुलाराशौ स्थित्वा मेषनवांशस्थो भवति स एव शनिः विपरीतावस्थायां मेषराशौस्थित्वा तुलायां च गोचरभ्रमणं करोति तदा भ्रातृणां कृते शुभं फलं मिलति ।

**शत्रुभीतित्मनस्तापमन्तश्छिद्रकलापवान् ।**

**चन्द्रांशराशिगे मन्दे गोचरे जन्मगेऽथवा ।।**[303]

(चन्द्रकलानाडीग्रन्थः, भागः-२, श्लो.-३०२४, पृ.-४७)

अर्थात् यदा गोचरस्थो शनिः चन्द्रनवांशतुल्यमिथुनराश्युरुपरिभ्रमणं करोति तदा जातको मानसिकपरितापमवाप्नोति, समाजात्(विना कारणेन दोषारोपणं) छिद्रकलपोऽपिप्राप्नोति।तथैव-

**सूर्यांशराशिगे मन्दे चन्द्रांशे केतुसंस्थिते।**

**पापिनो च पितृव्यौ द्वौ मातुलौ भवतस्तथा।।**[304]

(चन्द्रकलानाडीग्रन्थः, भागः-२, श्लो.-३०४९, पृ.-५९)

अर्थात् जन्मकुण्डल्यां यस्मिन् राशौ शनेः स्थितिः भवेत् तस्य नवांशतुल्यराशौयदा सूर्यः परिभ्रमणं करोति तस्मिन् काले पितृव्यौ (पितुः भ्रातृभ्यां) मध्ये कलहः उत्पद्यते वा तौ द्वौ पापकर्मरतौ भवतः । तथैव जन्मकुण्डल्यां

---

303 प्रायोगिक ज्योतिष विचार, (गुजराती), स्व.श्री एन.एम. शेठिया, बरोडा एस्ट्रोलोजिकल क्लब, वडोदरा, २००४, पृ. सं. ४५

304 प्रायोगिक ज्योतिष विचार, (गुजराती), स्व.श्री एन.एम. शेठिया, बरोडा एस्ट्रोलोजिकल क्लब, वडोदरा, २००४, पृ. सं. ४६

शनेः स्थित्यनुसारराशौवा नवांशतुल्यराशौ यदा चन्द्रः परिभ्रमणं करोति तदा (मातुलौ)मातुः भ्रातरौ पापकर्मरतौ भवतः । सिद्धान्तोऽयंअन्यग्रहाणां कृतेऽपि योगकारकः वर्तते ।

**चन्द्रांशकत्रिकोणेषु मासे निर्याणसम्भ्रमम्।**

**चरराशिगते चन्द्रे तस्मिन् मासे मृतिं वदेत् ।।**[305]

(चन्द्रकलानाडीग्रन्थः, भागः-२, श्लो.-३०२४, पृ.-५९)

अर्थात् सूर्यः यदा चन्द्रस्यनवांशतुल्यराशीतः परिभ्रमणं करोतिअथवातस्य त्रिकोणराश्युरुपरिभ्रमणं करोति तदा (तस्मिन्मासे)जातकस्य मृतिः वदेत् ।

**तल्लाभे गोचरे मन्दे पुत्रिकोद्वाहसम्भ्रमः।**

**विक्रमेशे यदंशस्थे तद्राशौ वा निरीक्षिते ।।**[306]

(चन्द्रकलानाडीग्रन्थः, भागः-२, श्लो.-३०२४, पृ.-५९)

अर्थात् तृतीयभावाधिपतेः नवांशतुल्यराश्योपरि तस्य स्वामिनः (गोचरे)दृष्टिर्भवतितदा जातकस्य कन्यायाः उद्वाहप्रसङ्गो उत्पद्यते । इत्थं विवाहादिष्वपि ज्ञातव्यम्।

**६.१९ गोचरस्थ ग्रहानुसारेण शुभाशुभघटनायाः निर्देशः (देवकेरलं नाडीग्रन्थाधारेण):-**

---

305 प्रायोगिक ज्योतिष विचार, (गुजराती), स्व.श्री एन.एम. शेठिया, बरोडा एस्ट्रोलोजिकल क्लब, वडोदरा, २००४, पृ. सं. ४६

306 प्रायोगिक ज्योतिष विचार, (गुजराती), स्व.श्री एन.एम. शेठिया, बरोडा एस्ट्रोलोजिकल क्लब, वडोदरा, २००४, पृ. सं. ४६

(पटेलमहोदयस्य प्रस्तुतलेखः जनवरी-१९९५ वर्षे टाइम्स ओफ ओस्ट्रोलोजी मासिकस्याङ्के प्रसिद्धिं गतः, तत्र चन्द्रकला नाडीग्रन्थस्य सिद्धान्तानुसारेण गोचरस्थितेः शुभाशुभघटनायाः वर्णनं विद्यते)[307]

**रन्ध्रेशाकान्तभवन दृष्टराश्येशकोणगाः।।**

**क्रूरमासा इति ख्याताः क्रूराब्दे योजयेत् क्रमात् ।**

**तत्तद्भावामृषाधीशं कान्त राश्यंश त्रिकोणे ।।**[308]

(चन्द्रकलानाडीग्रन्थः, भागः-२, श्लो.-१७७४-७५, पृ.-२४१)

अर्थात् अष्टमाधिपतिः यस्मिन् राशौ स्यात् तथा च तत्रतः त्रिकोणराशीः, राश्युपरिदृष्टिश्च भवेत्, अथवा अष्टमाधिपतिः यस्मिन् नवांशे स्थितो भवेत् तत्रतः त्रिकोणराशीः क्रूरराशी इत्युच्यते ।

यदा सूर्यः उपर्युक्तराशौ गोचरे परिभ्रमणं करोति सः मासः क्रूरमासो भवति । गुरोः परिभ्रमणं स्यात् तं क्रूरवर्षं कथ्यते । उपर्युक्तस्थितिः यदा उद्भवति तदा गुरोः शनेर्वा परिभ्रमणं स्याताम् तदा स्वजनस्य निधनं वा जीवने क्रूरस्थितिरुद्भवति।

---

307 प्रायोगिक ज्योतिष विचार, (गुजराती), स्व.श्री एन.एम. शेठिया, बरोडा एस्ट्रोलोजिकल क्लब, वडोदरा, २००४, पृ. सं. ४८

308 प्रायोगिक ज्योतिष विचार, (गुजराती), स्व.श्री एन.एम. शेठिया, बरोडा एस्ट्रोलोजिकल क्लब, वडोदरा, २००४, पृ. सं. ४९

**कुलीरसिंहलिझषे कुम्भे नकरे दिवाकरे ।**

**क्रूरराशिमिति प्रोक्तं क्रूरमासं तथैव च ।।**[309]

(चन्द्रकलानाडीग्रन्थः, भागः-३, श्लो.-४९२३, पृ.-२१७)

अर्थात् कर्कः, सिंहः, वृश्चिकः, मीनः, कुम्भः तथा च मकरराशयः क्रूरराशयः सन्ति । तासु यदा सूर्यः गोचरे परिभ्रमणं करोति तं क्रूरमासं कथ्यते । यदा उपर्युक्तराशीषु शनि-राहु-केत्वादीनां गोचरभ्रमणं भवति तदा जातकस्य कस्यापि स्वजनस्य निधनं भवतीति निश्चप्रचम्। किन्तु यस्मिन् काले शुभग्रहाः परिभ्रमन्ति तदा जातकस्य जीवने शुभं फलमुत्पद्यते।

**६.२० मेषादिराशीनां स्वराधारेण नवंशानुरूपफलकथनम् :-**

यथा स्वरशास्त्रे ग्रहास्वरः भवति तथैव राशिस्वरो अपि भवति । राश्याधारेणैव नवांशानुरूपंस्वरानामुल्लेखो अपि कृतो विद्यते । अस्मिन् विषये कथितं वर्तते यत् मेषराशे: नवनवांशाः, वृषभराशेः नवनवांशाः,तथा च मिथुनराशेः षड्नवांशाः इति अस्वरस्य आधिपत्यं भवति । पुनः तत्र मिथुनराशेः अवशिष्टाः नवांशाः, कर्कराशेः नवनवांशाः, सिंहराशेश्च नवनवांशाः इति इकारस्य आधिपत्यं भवति । कन्याराशेः नवनवांशाः, तुलाराशेः नवनवांशाः तथा च वृश्चिकराशेः त्रयो नवांशाः उकारस्य आधिपत्यं भवति । पुनः वृश्चिकराशेः अवशिष्टाः षड्नवांशाः, धनुराशेः नवनवांशाः, मकरराषेश्च षड्नवांशाः, एकारस्य आधिपत्यं भवति । मकरराशेः त्रयो अवशिष्टाः नवांशाः, कुम्भराशेः नवनवां शाः,

[309] प्रायोगिक ज्योतिष विचार, (गुजराती), स्व.श्री एन.एम. शेठिया, बरोडा एस्ट्रोलोजिकल क्लब, वडोदरा, २००४, पृ. सं. ५०

मीनराषेश्चनवनवांशाः ओकारस्य आधिपत्यं भवति । एवमेव प्रकारेण नवांशानुरोधेन राशीनां स्वराणां विभाजनं कृतमस्ति। यथा हि तत्र कथितम् –

**मेषवृषावकारे च मिथुनाद्याः षडंशकाः।**

**मिथुननांशत्रयं चैवमिकारे सिंहकर्कटौ ।।**

**कन्या तुलाउकारे च वृश्चिकाद्यास्त्रयोऽशंकाः।**

**एकारे वृश्चिकान्त्यांशाश्चापः षट् च मृगादिमाः ।।**

**अंशास्त्रयो मृगस्यान्ताः कुम्भमीनौ तथौस्वरौ।**

**एवं राशिस्वराः प्रोक्ताः नवांशैकक्रमोदयाः।।**[310]

मानवः शरीरे श्वास-निःश्वासमाध्यमेन जन्मकालादारभ्य मृत्युपर्यन्तम् अहर्निशं स्वरसन्धानं भवति । स्वरानुसारेण जीवने शुभाशुभकर्मणां कालः, लाभालाभः, जय-पराजयः, भूत-भविष्यत्-वर्तमानसम्बन्धिताः घटनाः इत्यादि विषयाः अपि ज्ञातुं शक्यन्ते । अतः कालान्तरेण स्वरशास्त्रस्य ज्योतिषशास्त्रे अन्तर्भावः जातः ।

❁ ❁ ❁

[310] नरपतिजयचर्या-स्वरोदयः, २/२८